रुपेश

हनुमत्सहस्रनामस्तोत्रम्

वेदाचार्य पं० दौलतराम गौड स्मारक ग्रन्थमाला की ७३वीं पुष्पलता

हनुमत्सहस्त्रनामस्तोत्रम्

(हनुमत्पूजन, हनुमत्सहस्त्रनामस्तोत्र, हनुमत्कवच, पञ्चमुखहनुमत्कवच, सप्तमुखहनुमत्कवच, एकादशमुखहनुमत्कवच, श्रीहनुमत्स्तोत्र, श्रीमारुतिस्तोत्र, श्रीहनुमदष्टोत्तरशतनामस्तोत्र, हनुमत्सहस्त्रनामावली, श्रीहनुमदष्टोत्तरशतनामावली, श्रीहनुमद्द्वादशाक्षरमन्त्रजपप्रयोग, श्रीहनुमद्अष्टादशाक्षरमन्त्रप्रयोग, हनुमद्-याग और हनुमद्-प्रतिष्ठा आदि विषयों से युक्त)

अशोकेन्दुहिन्दी-टीकासंवलित

व्याख्याकार

डॉ० अशोक कुमार गौड

वेदाचार्य, पी.एच-डी.

प्रकाशक :

रुपेश ठाकुर प्रसाद प्रकाशन

कचौड़ीगली, वाराणसी-221001

फोन : 2392471, 2392543

प्रथम संस्करण]

प्रस्तावना

हमारे सनातन धर्म में अनेक उपास्य देवता हैं। स्मार्तोपासना में पंचदेव उपासना प्रसिद्ध है ही, किन्तु इन सभी उपास्य देवों में यदि किसी को ब्रह्मचर्य का मूर्तिमान् स्वरूप कहा जा सकता है तो वे हनुमानजी ही हैं।

सम्पूर्ण भारतवर्ष में हनुमानजी का महत्त्व पूजा और उपासना की दृष्टि से अप्रतिम है। इनके उपासक पूजक न केवल सनातनधर्मावलम्बी ही हैं, अपितु अन्य मतावलम्बी भी हैं। शाक्त, शैव आदि सम्प्रदायों के लोग भी इनकी पूजा अर्चना श्रद्धा से करते हैं। तेज, धैर्य, यश, दक्षता, शक्ति, विनय, नीति, पुरुषार्थ, पराक्रम और बुद्धि ये गुण हनुमानजी में नित्य स्थित हैं। हनुमानजी में सभी गुणों का अद्‌भुत समन्वय है। वे ऐसे विलक्षण भी हैं, जिनमें सभी कार्यों को करने की क्षमता है। कार्तिक कृष्ण चतुर्दशी, भौमवार, स्वाती नक्षत्र और मेष लग्न में माता अंजना के गर्भ से स्वयं शिवजी ने कपीश्वर हनुमान के रूप में अवतार ग्रहण किया। इस प्रकार महादेवजी ने पवनपुत्र अंजनीनन्दन सत्य-विक्रमी श्रीहनुमान के रूप में अवतीर्ण हुए। इन्हें साक्षात् शिवावतार भी कहा गया है। भगवान् शिव परम मंगलमय हैं ही। 'शिव' शब्द का अर्थ ही परममंगल है।

हनुमानजी के स्मरण से मनुष्य में बुद्धि, बल, यश, धैर्य, निर्भयता, आरोग्यता, विवेक और वाक्पटुता आदि गुण आ जाते हैं। आकस्मिक विघ्न और आरोग्यता प्रदान करना इनकी सबसे बड़ी विशेषता है।

हनुमानजी की उपासना कब से आरम्भ हुई यह कहना अत्यधिक कठिन है। किन्तु आज के इस कलिकाल में उनके देवालय और भक्तों की संख्या की गणना नहीं की जा सकती। क्योंकि यह अपने भक्तों को मनोवांछित वर प्रदान करते हैं।

इनके पूजन व स्तोत्रों से युक्त यह पुस्तक आप सभी महानुभावों के समक्ष प्रस्तुत कर रहा हूँ। मुझे आशा ही नहीं अपितु, पूर्ण विश्वास है कि इस पुस्तक के द्वारा पाठकगण लाभ उठा सकेंगे।

भवदीय
अशोक कुमार गौड

भारतीय कर्मकाण्ड मण्डल
म. म. पा. पं. विद्याधरगौड लेन
डी. ७/१४ सकरकन्दगली, वाराणसी
मो० ९७९२३५३७४५

विषय-सूची

विषय	पृष्ठ सं.
हनुमत्पूजनम्	५
हनुमत्सहस्रनामस्तोत्रम्	२५
हनुमत्कवचम्	५०
पञ्चमुखहनुमत्कवचम्	५८
सप्तमुखहनुमत्कवचम्	६४
एकादशमुखहनुमत्कवचम्	६८
श्रीहनुमत्स्तोत्रम्	७२
श्रीमारुतिस्तोत्रम्	७६
श्रीहनुमदष्टोत्तरशतनामस्तोत्रम्	७८
हनुमत्सहस्रनामावलिः	८०
श्रीहनुमद्-अष्टोत्तरशतनामावलिः	९५
श्रीहनुमद्द्वादशाक्षरमन्त्रजपप्रयोगः	९७
श्रीहनुमद्अष्टादशाक्षरमन्त्रप्रयोगः	९८
हनुमद् याग	९९
हनुमद् प्रतिष्ठाविधि	९९
श्रीहनुमत्-स्तवन	१००
संकटमोचनस्तोत्रम्	१०१
संकटमोचन हनुमानाष्टक	१०२
बजरंगबाण	१०३
हनुमान चालीसा	१०५
श्रीहनुमत् विषये विशेषविचार	१०७
श्रीहनुमद् व्रतकथा	१०८
आरती बजरङ्गबली की	११२

हनुमत्पूजनम्

कर्ता और उसकी धर्मपत्नी को आसन पर पूर्वाभिमुख बैठाकर आचार्य निम्न तीन नामों का उच्चारण करते हुए कर्ता से आचमन करावें—**ॐ केशवाय नमः ॐ नारायणाय नमः ॐ माधवाय नमः।** इसके बाद **ॐ ऋषिकेशाय नमः, ॐ गोविन्दाय नमः** का उच्चारण करके कर्ता का हाथ जल से धुलवावें।

आचार्य निम्न मन्त्र का उच्चारण करके कर्ता को कुशा की पवित्री धारण करवावें—

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ तस्य ते पवित्रपते पवित्र पूतस्य यत्कामः पुने तच्छकेयम्॥

आचार्य निम्न श्लोक का उच्चारण करके कर्ता के ऊपर और पूजन सामग्री की पवित्रता हेतु दूर्वा के द्वारा जल छिड़कें—

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु।

इसके पश्चात् कर्ता प्राणायाम करके निम्न मन्त्र का उच्चारण करते हुए कर्ता से भगवान विष्णु का ध्यान करावें—

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपाꣳ सुरे स्वाहा॥

आचार्य निम्न विनियोग व पौराणिक श्लोक का उच्चारण करते हुए कर्ता से आसन शुद्धि कर्म करावें—

ॐ पृथ्वीतिमन्त्रस्य मेरुपृष्ठ ऋषिः, सुतलं छन्दः, कूर्मो देवता आसनपवित्र करणे विनियोगः।

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि! पवित्रं कुरु चासनम्॥

आचार्य निम्न श्लोक का उच्चारण करके कर्ता का शिखा का बन्धन करावें—

ॐ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने।
तिष्ठ देवि शिखामध्ये चामुण्डे चापराजिते॥

आचार्य भूमि में अक्षत छोड़वाकर आगे दिए हुए मन्त्र का उच्चारण करते हुए उसपर कर्ता से दीपक प्रज्वलित करावें—

भो दीप! देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत्।
यावत्कर्मसमाप्तिः स्यात् तावत्त्वं सुस्थिरो भव॥

आचार्य निम्न श्लोक का उच्चारण करके कर्ता से दीपक की प्रार्थना करावें—

शुभं करोतु कल्याणमारोग्यं धनसम्पदाम्।
शत्रुबुद्धिविनाशाय दीपज्योतिर्नमोऽस्तु ते॥

तदुपरान्त आचार्य और ब्राह्मण 'ॐ आ नो भद्रा०' से आरम्भ कर 'सर्वकार्मार्थसिद्धये' तक पढ़कर स्वस्तिवाचन करें।

ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे॥ १ ॥
देवानां भद्रा सुमतिर्ऋजूयतां देवानाठं० रातिरभि नो निवर्तताम्।
देवानाठं० सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे॥ २ ॥
तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिन्दक्षमस्त्रिधम्।
अर्यमणं वरुणठं० सोममश्विना सरस्वती नः सुभगा मयस्करत्॥ ३ ॥
तन्नो वातो मयो भुव्वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणु तन्धिष्ण्या युवम्॥ ४ ॥
तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ ५ ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ ६ ॥
पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथे षु जग्मयः।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह॥ ७ ॥
भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाठं० सस्तनूभिर्व्यशेमहि देवहितं यदायुः॥ ८ ॥
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः॥ ९ ॥
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः।
विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्॥ १० ॥
द्यौः शान्तिरन्तरिक्षठं० शान्तिः पृथिवी
शान्तिरापः शान्तिरोषधयः शान्तिः।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः
सर्वठं० शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥ ११ ॥

यतो यतः समीहसे ततो नो अभयं कुरु।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः॥ १२॥
सुशान्तिः सर्वारिष्टशान्तिर्भवतु॥

ॐ लक्ष्मीनारायणाभ्यां नमः। ॐ उमामहेश्वराभ्यां नमः।
ॐ वाणीहिरण्यगर्भाभ्यां नमः। ॐ शचीपुरन्दराभ्यां नमः।
ॐ मातापितृचरण कमलेभ्यो नमः। ॐ इष्टदेवताभ्यो नमः।
ॐ ग्रामदेवताभ्यो नमः। ॐ कुल देवताभ्यो नमः।
ॐ स्थानदेवताभ्यो नमः। ॐ वास्तुदेवताभ्यो नमः।
ॐ एतत्कर्मप्रधानदेवताभ्यो नमः। ॐ गुरुचरणकमलेभ्यो नमः।
ॐ सर्वेभ्यो देवेभ्यो नमः। ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः।
ॐ भूर्भुवः स्वः श्रीसिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः।

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥ १ ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥ २ ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥ ३ ॥
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥ ४ ॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥ ५ ॥
वक्रतुण्ड! महाकाय! कोटिसूर्यसमप्रभ!।
अविघ्नं कुरु मे देव! सर्वकार्येषु सर्वदा॥ ६ ॥
सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके!।
शरण्ये त्र्यम्बके गौरि नारायणि! नमोऽस्तु ते॥ ७ ॥
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः॥ ८ ॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि॥ ९ ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥ १०॥
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥ ११॥
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः॥ १४॥
विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम्।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम्॥ १५॥

कर्ता के दायें हाथ में जल, अक्षत और द्रव्य रखवाकर आचार्य निम्न संकल्प करावें—

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्यावर्तैकदेशे, अमुकक्षेत्रे अमुकनद्याः अमुकतीरे विक्रमशके बौद्धावतारे अमुकनाम्नि संवत्सरे अमुकायने अमुकऋतौ महामाङ्गल्यप्रदमासोत्तमे मासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथास्थानस्थितेषु सत्सु एवं गुणगणविशेषणविशिष्टायां शुभपुण्य-तिथौ अमुकगोत्रोऽमुकशर्माहं (वर्माऽहम्, गुप्तोऽहम्) ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं सकुटुम्बस्य सपरिवारस्य दीर्घायुरारोग्यैश्वर्यादिवृद्ध्यर्थं समस्तकामनासंसिद्ध्यर्थम् इह जन्मनि जन्मान्तरे वा सकलदुरितोपशमनार्थं तथा अखिलआधिव्याधि-जरापीडामृत्युपरिहारार्थं पुत्र-पौत्रादिसन्ततेरविच्छिन्नाभिवृद्ध्यर्थम् (अमुकमनोरथपरिपूर्त्यर्थं वा) श्रीहनुमत्पूजनं करिष्ये।

तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं करिष्ये।

संक्षिप्त

गणेशाऽम्बिकापूजनम्

कर्ता हाथ में लाल पुष्प और अक्षत लेकर मन्त्रों का उच्चारण करते हुए गणेशाम्बिका का आवाहन करें—

ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वां निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भ धमा त्वमजासि गर्भधम्॥

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहिताय श्रीमन्महागणपतये नमः,
गणपतिमावाहयामि स्थापयामि।

**ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन।
ससस्त्यश्वकः सुभद्रिकां कां पीलवासिनीम्॥**

ॐ भूर्भुवः स्वः गौर्यै नमः, गौरीमावाहयामि स्थापयामि।

प्रतिष्ठापनम्—**ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्व-रिष्टं यज्ञꣳ समिमं दधातु। विश्वेदेवास ऽइह मादयन्तामो ३ँ प्रतिष्ठ ॥**

ॐ भूर्भुवः स्वः गणेशाऽम्बिके सुप्रतिष्ठिते वरदे भवेताम्।

गणेशाम्बिकाभ्यां नमः, एतानि पाद्याऽर्घ्याचमनीयस्नानीयपुनराचमनी-यानि समर्पयामि। वस्त्रं समर्पयामि गणेशाम्बिकाभ्यां नमः। गन्धानुलेपनम् अक्षतांश्च समर्पयामि। पुष्पाणि नानापरिमलद्रव्याणि च समर्पयामि। धूपमाघ्राप-यामि, प्रत्यक्षदीपं प्रदर्शयामि। हस्तप्रक्षालनं नैवेद्यं निवेदयामि। आचमनीयं मध्ये पानीयम्, उत्तरापोषणम्, हस्तप्रक्षालनम्, मुखवासार्थे पूगीफल-ताम्बूलम्, दक्षिणाम्, प्रदक्षिणाम् आरार्तिक्यम्, मन्त्रपुष्पाञ्जलिम्, विशेषार्घ्यं च समर्पयामि।

प्रार्थना

**विघ्नेश्वराय वरदाय सुरप्रियाय, लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतियज्ञ विभूषिताय, गौरीसुताय गणनाथ नमो नमस्ते॥**

इति गणेशाम्बिकयोः पूजनं कृत्वा पूर्ववदर्घपात्रे गन्धादि कृत्वा—

**ॐ रूपं देहि जयं देहि सौभाग्यं देहि देवि मे।
पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे॥**

'ॐ अम्बिकायै नमः' इति विशेषार्घं समर्पयामि। 'अनया पूजया गणेशाम्बिके प्रीयेतां न मम' इति जलं प्रक्षिपेत्। 'आचरितगणेशाम्बिका-पूजनविधौ यन्न्यूनातिरिक्तं तत्परिपूर्णमस्तु।'

श्रीहनुमत्पूजनम्

ध्यानम्—निम्न श्लोकों का उच्चारण करके हनुमानजी का ध्यान करें—

उद्यद्भानुसहस्रसंनिभतनुः पीताम्बरालंकृतः
प्रोज्ज्वालानलदीप्यमाननयनो निष्पिष्टरक्षोगणः।
संवर्तोद्यतवारिदोद्धतरवः प्रोच्चैर्गदाविभ्रमः
श्रीमान् मारुतनन्दनः प्रतिदिनं ध्येयो विपद्भञ्जनः॥ १॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः।
आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम्॥ २॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये॥ ३॥

सर्वसिद्धिकराय श्रीहनुमते नमः, ध्यानं समर्पयामि।

आवाहनम्—निम्न मन्त्रों और श्लोक का उच्चारण करके हनुमानजी का आवाहन करें—

ॐ आतिथ्यरूपं मासरं महावीरस्य नग्नहुः।
रूपमुपसदामेतत्तिस्रो रात्रीः सुरासुता॥
ॐ नमस्ते रुद्र मन्यवऽउतो त ऽइषवे नमः। बाहुभ्यामुत ते नमः॥
श्रीरामचरणाम्भोजयुगलस्थिरमानसम्।
आवाहयामि वरदं हनुमन्तमभीष्टदम्॥

सर्वसिद्धिकराय श्रीहनुमते नमः, आवाहनं समर्पयामि।
आवाहनार्थे पुष्पाणि समर्पयामि।

आसनम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को आसन प्रदान करें—

ॐ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि॥
नवरत्नमयं दिव्यं चतुरस्त्रमनुत्तमम्।
सौवर्णमासनं तुभ्यं कल्पये कपिनायक॥

सर्वसिद्धिकराय श्रीहनुमते नमः, आसनं समर्पयामि।
आसनार्थे अक्षतान् समर्पयामि।

पाद्यम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को पाद्य प्रदान करें—

ॐ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवाङ्गिरित्रताङ्कुरु मा हिंसी: पुरुषं जगत्॥
सुवर्णकलशानीतं सुष्ठु वासितमादरात्।
पादयो: पाद्यमनघ प्रतिगृह्ण प्रसीद मे॥

सर्वसिद्धिकराय श्रीहनुमते नम:, पाद्यं समर्पयामि।

अर्घ्यम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को अर्घ्य प्रदान करें—

ॐ शिवेन वचसा त्त्वा गिरिशाऽच्छावदामसि।
यथा न: सर्व्वमिज्जगदयक्ष्मठं० सुमना ऽअसत्॥
कुसुमाक्षतसम्मिश्रं गृह्यतां कपिपुङ्गव।
दास्यामि तेऽञ्जनीपुत्र स्वमर्घ्यं रत्नसंयुतम्॥

सर्वसिद्धिकराय श्रीहनुमते नम:, अर्घ्यं समर्पयामि।

आचमनीयम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को आचमनीय जल प्रदान करें—

ॐ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहींठं०श्च सर्वान् जम्भयन्त्सर्वाश्च यातु धान्योऽधराची: परासुव॥
महाराक्षसदर्पघ्न सुराधिपसुपूजित।
विमलं शमलघ्न गृहाणाचमनीयकम्॥

सर्वसिद्धिकराय श्रीहनुमते नम:, आचमनीयं जलं समर्पयामि।

स्नानम्—निम्न मन्त्र का उच्चारण करके हनुमानजी को स्नान करावें—

ॐ असौ यस्ताम्रो अरुण ऽउत बब्भ्रु: सुमङ्गल:। ये चैनठं० रुद्द्रा ऽअभितो दिक्षु श्रिता: सहस्रशोऽवैषाठं० हेड ऽईमहे॥

सर्वसिद्धिकराय श्रीहनुमते नम:, स्नानं समर्पयामि।

पय:स्नानम्—निम्न मन्त्र और आगे दिए हुए श्लोक का उच्चारण करके हनुमानजी को पय: स्नान करावें—

ॐ पय: पृथिव्यां पय ओषधी षु पयो दिव्यन्तरिक्षे पयो धा:।
पयस्वती: प्रदिश: सन्तु मह्यम्॥

कामधेनुःसमुद्भूतं सर्वेषां जीवनं परम्।
पावकं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्॥

सर्वसिद्धिकराय श्रीहनुमते नमः, पयःस्नानं समर्पयामि। पयःस्नानान्ते शुद्धोदकस्नानं समर्पयामि।

दधिस्नानम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को दधि से स्नान करावें—

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः।
सुरभि नो मुखा करत्प्रण आयूꣳषि तारिषत्॥

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम्॥

सर्वसिद्धिकराय श्रीहनुमते नमः, दधिस्नानं समर्पयामि। दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि।

घृतस्नानम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को घृत से स्नान करावें—

ॐ घृतं मिमिक्षे घृतमस्य यो निर्घृते श्रितो घृतं वस्य धाम।
अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्॥

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥

सर्वसिद्धिकराय श्रीहनुमते नमः, घृतस्नानं समर्पयामि। घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि।

मधुस्नानम्—निम्न मन्त्रों और श्लोक का उच्चारण करके हनुमानजी को मधु से स्नान करावें—

ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥
मधु नक्तमुतोषसो मधुमत्पार्थिवꣳरजः। मधु द्यौरस्तु नः पिता॥
मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः॥

दिव्यैः पुष्पैः समुद्भूतं सर्वगुणसमन्वितम्।
मधुरं मधुनामाढ्यं स्नानार्थं प्रतिगृह्यताम्॥

सर्वसिद्धिकराय श्रीहनुमते नमः, मधुस्नानं समर्पयामि। मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि।

शर्करास्नानम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को शर्करा से स्नान करावें—

ॐ अपाꣳरसमुद्वयसꣳसूर्य्ये सन्तꣳ समाहितम्। अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम्॥

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका।
मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्॥

सर्वसिद्धिकराय श्रीहनुमते नमः, शर्करास्नानं समर्पयामि। शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि।

पञ्चामृतस्नानम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को पंचामृत से स्नान करावें—

ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्त्रोतसः।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्॥
मध्वाज्यक्षीरदधिभिः सुगडैर्मन्त्रसंयुतैः।
पञ्चामृतैः पृथक् स्नानैः सिञ्चामि त्वां कपीश्वर!॥

सर्वसिद्धिकराय श्रीहनुमते नमः, पञ्चामृतस्नानं समर्पयामि। पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि। आचमनीयं जलं समर्पयामि।

महाभिषेकस्नानम्—निम्न मन्त्र और रुद्रसूक्त के मन्त्रों का उच्चारण करते हुए शंख के द्वारा हनुमानजी की मूर्ति पर जलधारा देवें—

ॐ आतिथ्यरूपं मासरं महावीरस्य नग्नहुः।
रूपमुपसदामेतत्तिस्त्रो रात्रीः सुरासुता॥
ॐ नमस्ते रुद्र मन्यव ऽउतो तऽ इषवे नमः।
बाहुब्भ्यामुत ते नमः॥ १॥
या ते रुद्र शिवा तनूरघोरापापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि॥ २॥
यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवाङ्गिरित्रताङ्कुरु मा हिꣳसीः पुरुषं जगत्॥ ३॥
शिवेन वचसा त्वा गिरिशाच्छा वदामसि।
यथा नः सर्वमिं जगदयक्ष्मꣳ सुमना असत्॥ ४॥
अद्ध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक।
अहींश्च सर्वां जम्भयनत्सर्वाश्च यातुधान्योऽधराचीः परासुव॥ ५॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः।
ये चनर्ठ० रुद्रा अभितो दिक्षु श्रिताः सहस्त्रशो वैषार्ठ० हेड ईमहे॥ ६॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैनङ्गोपाऽ अदृश्रनदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः॥ ७॥
नमोऽस्तु नीलग्रीवाय सहस्त्राक्षाय मीढुषे।
अथो ये अस्य सत्वानो हन्तेभ्यो करनमः॥ ८॥
प्रमुञ्च धन्वनस्त्वमुभयोरात्कर्न्योर्ज्याम्।
याश्च ते हस्तऽइषवः परा ता भगवो वप॥ ९॥
विज्यन्धनुः कपर्द्दिनो विशल्यो बाणवाँ२॥ उत।
अनेशनस्य या इषव आभुरस्य निषङ्गधिः॥ १०॥
या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः।
तयास्मान् विश्वतस्त्वमयक्ष्मया परिभुज॥ ११॥
परि ते धन्वनो हेंतिरस्मान्वृणक्तु विश्वतः।
अथो य इषुधिस्तवारे अस्मन्निधेहि तम्॥ १२॥
अवतत्त्य धनुष्ट्वर्ठ० सहस्त्राक्ष शतेषुधे।
निशीय शल्यां मुखा शिवो नः सुमना भव॥ १३॥
नमस्तऽ आयुधायानातताय धृष्णवे।
उमाब्भ्यामुत ते नमो बाहुब्भ्यान्तव धन्वने॥ १४॥
मानो महान्तमुत मा नोऽ अर्भकमा नऽ उक्षितम्।
मानो वधीः पितरमोत मातरमानः प्रियास्तन्वो रुद्द्ररीरिषः॥ १५॥
मा नस्तोके तनये मा न ऽआयुषि मा नो गोषु मा नो ऽअश्वेषु रीरिषः।
मा नो वीरान् रुद्द्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥ १६॥

सर्वसिद्धिकराय श्रीहनुमते नमः, महाभिषेकस्नानं समर्पयामि।

शुद्धोदकस्नानम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को शुद्ध जल से स्नान करावें—

ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः। श्येतः श्येताक्षोऽरुणास्ते रुद्राय पशुपतये कर्णा यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः॥

सुवर्णकलशानीतैर्गङ्गादिसरिदुद्भवैः ।
शुद्धोदकैः कपीश त्वामभिषिञ्चामि मारुते॥

सर्वसिद्धिकराय श्रीहनुमते नमः, शुद्धोदकस्नानं समर्पयामि। शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।

श्रीहनुमत्मूर्तिस्थापनम्—सिंहासन के ऊपर या कलश के ऊपर श्रीहनुमानजी की सुवर्ण मूर्ति स्थापित करके आगे का पूजन करें।

वस्त्रम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को वस्त्र प्रदान करें—

ॐ असौ ग्योऽवसर्प्पति नीलग्रीवो व्विलोहितः।
उतैनं गोपा ऽअदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः॥
पीताम्बरसुवर्णाभमुत्तरीयार्थमेव च।
दास्यामि जानकीप्राणत्राणकारण गृह्यताम्॥

सर्वसिद्धिकराय श्रीहनुमते नमः. वस्त्रं समर्पयामि।

मौञ्जीमेखलाम्—निम्न श्लोक का उच्चारण करके हनुमानजी को मेखला प्रदान करें—

ॐ ग्रथितां नवभी रत्नैर्मेखलां त्रिगुणीकृताम्।
मौञ्जं मुञ्जमयीं पीतां गृहाण पवनात्मज॥

सर्वसिद्धिकराय श्रीहनुमते नमः, मौञ्जीमेखलां समर्पयामि।

कटिसूत्र-कौपीनम्—निम्न श्लोकों का उच्चारण करके हनुमानजी को लँगोट प्रदान करें—

कौशेयं कपिशार्दूल हरिद्राक्तं सुशोभनम्।
कटिसूत्रं गृहाणेदं कौपीनं मंगलास्पदम्॥
कटिसूत्रं गृहाणेदं कौपीनं ब्रह्मचारिणः।
कौशेयं कपिशार्दूल हरिद्रक्तं सुमङ्गलम्॥

सर्वसिद्धिकराय श्रीहनुमते नमः, कटिसूत्रमू एवं कौपीनं समर्पयामि।

यज्ञोपवीतम्—निम्न मन्त्र और आगे दिए हुए श्लोक का उच्चारण करके हनुमानजी को यज्ञोपवीत प्रदान करें—

ॐ नमोऽस्तु नीलग्रीवाय सहस्त्राक्षाय मीढुषे।
अथो ग्ये अस्य सत्त्वानोऽहन्तेभ्योऽकरं नमः॥

श्रौतस्मार्त्तादिकर्तॄणां साङ्गोपाङ्गफलप्रदम्।
यज्ञोपवीतमनघं धारयानिलनन्दन॥

सर्वसिद्धिकराय श्रीहनुमते नमः, यज्ञोपवीतं समर्पयामि। यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि।

गन्धम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को गन्ध प्रदान करें—

ॐ प्रमुञ्च धन्वनस्त्वमुभयोरात्र्योर्ज्याम्।
याश्च ते हस्त ऽइषवः पराता भगवो वप॥

दिव्यकर्पूरसंयुक्तं मृगनाभिसमन्वितम्।
स-कुङ्कुमं पीतगन्धं ललाटे धारय प्रभो!॥

सर्वसिद्धिकराय श्रीहनुमते नमः, गन्धं समर्पयामि।

अक्षतान्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को अक्षत चढ़ावें—

ॐ अक्षन्नमीमदन्त ह्यवप्रिया अधूषत। अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्रते हरी॥

हरिद्राक्तानक्षतांस्त्वं कुङ्कुमद्रव्यमिश्रितान्।
धारय श्रीगन्धमध्ये शुभशोभनवृद्धये॥

सर्वसिद्धिकराय श्रीहनुमते नमः, अक्षतान् समर्पयामि।

पुष्पाणि—निम्न मन्त्र का उच्चारण करके हनुमानजी को पुष्प प्रदान करें—

ॐ विज्यं धनुः कपर्द्दिनो विशल्ल्यो बाणवाँ२ ऽउत।
अनेशन्नस्य या ऽइषव आभुरस्य निषङ्गधिः॥

नीलोत्पलैः कोकनदैः कह्लारैः कमलैरपि।
कुमुदैः पुण्डरीकैस्त्वां पूजयामि कपीश्वर॥
मल्लिकाजातिपुष्पैश्च पाटलैः कुटजैरपि।
केतकीबकुलैश्चूतैः पुन्नागैर्नागकेसरैः॥
चम्पकैः शतपत्रैश्च करवीरैर्मनोहरैः।
पूजये त्वां कपिश्रेष्ठ सबिल्वैस्तुलसीदलैः॥

सर्वसिद्धिकराय श्रीहनुमते नमः, पुष्पाणि समर्पयामि।

तुलसीदलानि—निम्न मन्त्र का उच्चारण करके हनुमानजी को तुलसीदल प्रदान करें—

ॐ इदं विष्णुर्विचक्रमे त्रेधा पदम्। समूढस्य पाठ॰सुरे स्वाहा॥

सर्वसिद्धिकराय श्रीहनुमते नमः, तुलसीदलानि समर्पयामि।

अबीरम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को अबीर प्रदान करें—

ॐ अहिरिव भोगैः पर्य्येति बाहुँ ज्याया हेतिं परिबाधमानः। हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाठ॰ सं परिपातु विश्वतः॥

अबीरं च गुलालं च हरिद्रादिसमन्वितम्।
नानापरिमलं द्रव्यं गृहाण परमेश्वर॥

सर्वसिद्धिकराय श्रीहनुमते नमः, अबीरं समर्पयामि।

सिन्दूरम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को सिन्दूर प्रदान करें—

ॐ सिन्धोरिव प्राद्ध्वने शुघनासो वातप्रमियः पतयन्ति यह्वाः। घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः॥

दिव्यनागसुद्भूतं सर्वमङ्गलकारकम्।
तैलाभ्यङ्गयिष्यामि सिन्दूरं गृह्यतां प्रभो॥

सर्वसिद्धिकराय श्रीहनुमते नमः, सिन्दूरं समर्पयामि।

सुगन्धितद्रव्यम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को सुगन्धित द्रव्य प्रदान करें—

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमाऽमृतात्॥

मनोहरं गन्धद्रव्यं रुचिराऽगुरुवासितम्।
देहशोभाकरं नित्यं गृहाण कपिपुङ्गव॥

सर्वसिद्धिकराय श्रीहनुमते नमः, सुगन्धितद्रव्यं समर्पयामि।

ग्रन्थिपूजनम्—**ॐ अञ्जनीसूनवे नमः, प्रथमग्रन्थिं पूजयामि। ॐ हनुमते नमः, द्वितीयग्रन्थिं पूजयामि। ॐ वायुपुत्राय नमः, तृतीयग्रन्थिं**

पूजयामि। ॐ महाबलाय नमः, चतुर्थग्रन्थिं पूजयामि। ॐ रामेष्टाय नमः, पञ्चमग्रन्थिं पूजयामि। ॐ फाल्गुनसखाय नमः, षष्ठग्रन्थिं पूजयामि। ॐ पिङ्गाक्षाय नमः, सप्तमग्रन्थिं पूजयामि। ॐ अमित-विक्रमाय नमः, अष्टमग्रन्थिं पूजयामि। ॐ कपीश्वराय नमः, नवमग्रन्थिं पूजयामि। ॐ सीताशोकविनाशनाय नमः, दशमग्रन्थिं पूजयामि। ॐ लक्ष्मणप्राणदात्रे नमः, एकादशग्रन्थिं पूजयामि। ॐ दशग्रीवदर्पघ्नाय नमः, द्वादशग्रन्थिं पूजयामि। ॐ भविष्यद्ब्राह्मणे नमः, त्रयोदशग्रन्थिं पूजयामि।

अङ्गपूजनम्—१. ॐ हनुमते नमः पादौ पूजयामि। २. ॐ सुग्रीव-सखाय नमः गुल्फौ पूजयामि। ३. ॐ अङ्गदमित्राय नमः जंघे पूजयामि। ४. ॐ रामदासाय नमः उरू पूजयामि। ५. ॐ अक्षघ्नाय नमः कटिं पूजयामि। ६. ॐ लङ्कादहनाय नमः बालं पूजयामि। ७. ॐ राममणिदाय नमः नाभिं पूजयामि। ८. ॐ सागरोल्लङ्घनाय नमः मध्ये पूजयामि। ९. ॐ लङ्कामर्दनाय नमः केशावलिं पूजयामि। १०. ॐ सञ्जीवनीहर्त्रे नमः स्तनौ पूजयामि। ११. ॐ सौमित्रिप्राणदाय नमः वक्षः पूजयामि। १२. ॐ कुण्ठितदशवदनाय नमः कण्ठं पूजयामि। १३. ॐ रामाभिषेककारिणे नमः हस्तौ पूजयामि। १४. ॐ मन्त्ररचितरामायणाय नमः वक्त्रं पूजयामि। १५. ॐ प्रसन्नवदनाय नमः वदनं पूजयामि। १६. ॐ पिङ्गलनेत्राय नमः नेत्रे पूजयामि। १७. ॐ श्रुतिपारगाय नमः श्रुतिं पूजयामि। १८. ॐ उर्ध्वपुण्ड्रधारिणे नमः कपोलं पूजयामि। १९. ॐ मणिकण्ठमालिने नमः शिरः पूजयामि। २०. ॐ सर्वाभीष्टप्रदाय नमः सर्वाङ्गं पूजयामि।

नामपूजनम्—ॐ हनुमते नमः। ॐ अञ्जनीसूनवे नमः। ॐ वायुपुत्राय नमः। ॐ महाबलाय नमः। ॐ रामेष्टाय नमः। ॐ फाल्गुनसखाय नमः। ॐ पिङ्गाक्षाय नमः। ॐ अमितविक्रमाय नमः। ॐ उदधिक्रमणाय नमः। ॐ सीताशोकविनाशाय नमः। ॐ लक्ष्मणप्राणदात्रे नमः। ॐ दशग्रीवदर्पहन्त्रे नमः।

श्रीहनुमद् अष्टोत्तरशतनामभिस्तुलसी-बिल्वपत्र-अक्षतादिभिः पूजयेत्

१. ॐ हनुमते नमः।
२. ॐ वायुपुत्राय नमः।
३. ॐ रुद्राय नमः।
४. ॐ वीराय नमः।
५. ॐ सीताशोकविनाशनाय नमः।
६. ॐ रामभक्ताय नमः।
७. ॐ वनेचराय नमः।
८. ॐ बालाय नमः।
९. ॐ अञ्जनीसूनवे नमः।
१०. ॐ फाल्गुनप्रियाय नमः।
११. ॐ जानकीप्राणदात्रे नमः।
१२. ॐ राक्षसमारकाय नमः।
१३. ॐ रामदूताय नमः।
१४. ॐ पर्वतच्छेदनाय नमः।
१५. ॐ वायुपुत्राय नमः।
१६. ॐ ज्ञानिने नमः।
१७. ॐ वानराय नमः।
१८. ॐ चिरञ्जीविने नमः।
१९. ॐ संसारभयनाशनाय नमः।
२०. ॐ ब्रह्मचारिणे नमः।
२१. ॐ रामभक्तिविधायकाय नमः।
२२. ॐ कालाय नमः।
२३. ॐ कपिशाय नमः।
२४. ॐ कपिनायकाय नमः।
२५. ॐ लक्ष्मणप्राणदात्रे नमः।
२६. ॐ अमरेश्वराय नमः।
२७. ॐ जानकीधनशोकोत्थताप-हर्त्रे नमः।
२८. ॐ पुच्छलङ्काविदाहकाय नमः।
२९. ॐ वायुगतिमते नमः।
३०. ॐ मरुते नमः।
३१. ॐ सेतुबन्धविशारदाय नमः।
३२. ॐ अमितविक्रमाय नमः।
३३. ॐ यतीश्वराय नमः।
३४. ॐ तमोहर्त्रे नमः।
३५. ॐ कलाधराय नमः।
३६. ॐ कपीन्द्राय नमः।
३७. ॐ अमितमायाय नमः।
३८. ॐ कलिपावनाय नमः।
३९. ॐ प्राणाय नमः।
४०. ॐ सहस्राक्षाय नमः।
४१. ॐ कामजिते नमः।
४२. ॐ महायोगिने नमः।
४३. ॐ वायुवाहनाय नमः।
४४. ॐ सिद्धिहेतुकाय नमः।
४५. ॐ सत्यधर्माय नमः।
४६. ॐ सिद्धिदाय नमः।
४७. ॐ सिन्दूरलेपनाय नमः।
४८. ॐ कपिवृन्दप्रपूजिताय नमः।
४९. ॐ कृपामूर्त्तये नमः।
५०. ॐ रामहृदे नमः।
५१. ॐ वज्राङ्गाय नमः।
५२. ॐ भुजविक्रमाय नमः।
५३. ॐ श्रीरामहृदयानन्दाय नमः।
५४. ॐ पूर्णपिण्डजाय नमः।
५५. ॐ मेघरूपाय नमः।
५६. ॐ तत्त्वविद्याविशारदाय नमः।
५७. ॐ विशुद्धात्मने नमः।
५८. ॐ अरिष्टनाशनाय नमः।
५९. ॐ अमोघाय नमः।

६०. ॐ सर्वदेवस्तुताय नमः।
६१. ॐ सेतुकृते नमः।
६२. ॐ रामसारथये नमः।
६३. ॐ सुग्रीवादिस्तुताय नमः।
६४. ॐ दान्ताय नमः।
६५. ॐ नखयुद्धविशारदाय नमः।
६६. ॐ पर्वतभेदनाय नमः।
६७. ॐ वज्राङ्गाय नमः।
६८. ॐ चञ्चलाय नमः।
६९. ॐ पवनाय नमः।
७०. ॐ वानरेशाय नमः।
७१. ॐ अध्यात्मविद्याय नमः।
७२. ॐ सत्यरूपाय नमः।
७३. ॐ अञ्जनाप्राणलिङ्गाय नमः।
७४. ॐ वायुवंशोद्भवाय नमः।
७५. ॐ जयाय नमः।
७६. ॐ विजयाय नमः।
७७. ॐ सूक्ष्मदर्शनाय नमः।
७८. ॐ अञ्जनाप्राणलिङ्गाय नमः।
७९. ॐ योगविदाम्बराय नमः।
८०. ॐ योगयोनये नमः।
८१. ॐ फाल्गुनीसूनवे नमः।
८२. ॐ आनन्दविग्रहाय नमः।
८३. ॐ कुण्डलिने नमः।
८४. ॐ रुद्रानुकृते नमः।
८५. ॐ अनन्तविक्रमाय नमः।
८६. ॐ सदाचाराय नमः।
८७. ॐ शूरसेनाविदारकाय नमः।
८८. ॐ नवद्वारपुराधाराय नमः।
८९. ॐ अनन्तमङ्गलाय नमः।
९०. ॐ भयहृते नमः।
९१. ॐ धर्मपालाय नमः।
९२. ॐ शुभाङ्गाय नमः।
९३. ॐ सार्वभौमाय नमः।
९४. ॐ श्रीमते नमः।
९५. ॐ स्मृतये नमः।
९६. ॐ बीजाय नमः।
९७. ॐ चतुर्नवतिमन्त्रज्ञाय नमः।
९८. ॐ तारकाय नमः।
९९. ॐ शम्भुतेजसे नमः।
१००. ॐ सद्योजाताय नमः।
१०१. ॐ संसारभयनाशनाय नमः।
१०२. ॐ रामसेवकाय नमः।
१०३. ॐ ज्ञानमूर्तये नमः।
१०४. ॐ सहस्त्रवदनाय नमः।
१०५. ॐ अजेयाग्र नमः।
१०६. ॐ अङ्गदप्रियाय नमः।
१०७. ॐ चिरायुषे नमः।
१०८. ॐ रुद्रावताराय नमः।

धूपम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को धूप दिखावें—

ॐ या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः।
तयास्मान् विश्वतस्त्वमयक्ष्मया परिभुज॥
दिव्यं सुगुग्गुलं साज्यं सदशाङ्गं सवह्निकम्।
गृहाण मारुते धूपं सुप्रियं घ्राणतर्पणम्॥
सर्वसिद्धिकराय श्रीहनुमते नमः, धूपमाघ्रापयामि समर्पयामि।

दीपम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को दीप दिखावें—

ॐ परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः।
अथो य ऽइषुधिस्तवारे अस्मन्निधेहि तम्॥
घृतपूरितमुज्ज्वालं सितसूर्यसमप्रभम्।
अतुलं तव दास्यामि व्रतपूर्त्यै सुदीपकम्॥

सर्वसिद्धिकराय श्रीहनुमते नमः, दीपं दर्शयामि। (हस्तप्रक्षालनम्)।

नैवेद्यम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को नैवेद्य प्रदान करें—

ॐ अवतत्त्य धनुष्ट्वर्ठ० सहस्राक्ष शतेषुधे।
निशीर्ष्य शल्यानां मुखा शिवो नः सुमना भव॥
सशाकापूपसूपाद्यपायसानि च यत्नतः।
सक्षीरदधि साज्यं च सपूपं घृतपाचितम्॥

सर्वसिद्धिकराय श्रीहनुमते नमः, नैवेद्यं निवेदयामि। नैवेद्यान्ते आचमनीयं जलं समर्पयामि।

ऋतुफलम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को ऋतुफल प्रदान करें—

ॐ याः फलिनीर्य्या अफला अपुष्पा याश्च पुष्पिणीः।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वर्ठ०हसः॥
फलं नानाविधं स्वादु पक्वं शुद्धं सुशोभितम्।
समर्पितं मया देव गृह्यतां कपिनायक॥

सर्वसिद्धिकराय श्रीहनुमते नमः, ऋतुफलं समर्पयामि।

उत्तरापोशनम्—निम्न श्लोकों का उच्चारण करके हनुमानजी को उत्तरापोशन प्रदान करें—

आपोशनं नमस्तेऽस्तु पापराशितृणानलम्।
समर्पितं मया देव गृह्यतां कपिनायक॥ १॥
आपोशनं नमस्तेऽस्तु पापराशितृणानलम्।
कृष्णावेणीजलेनैव कुरुष्व पवनात्मज॥ २॥

सर्वसिद्धिकराय श्रीहनुमते नमः, उत्तरापोशनं समर्पयामि।

ताम्बूलम् (पूगफल-एला-लवंगसहित)—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को ताम्बूल आदि प्रदान करें—

ॐ उत स्मास्य द्द्रवतस्तुरण्यतः पर्ण्णन्नवे रनुवाति प्प्रगर्द्धिनः। श्येनस्येव द्ध्रजतो अङ्कसं परि दधिक्राब्णः सहोर्ज्जा तरित्रतः स्वाहा॥

ताम्बूलमनघ स्वामिन् प्रयत्नेन प्रकल्पितम्।
अवलोकय नित्यं ते पुरतो रचितं मया॥

सर्वसिद्धिकराय श्रीहनुमते नमः, ताम्बूलं समर्पयामि।

दक्षिणाम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी को दक्षिणा प्रदान करें—

ॐ हिरण्यगर्ब्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो।
अनन्तपुण्फलदमतः शान्तिं प्रयच्छ मे॥

सर्वसिद्धिकराय श्रीहनुमते नमः, द्रव्य दक्षिणां समर्पयामि।

आर्तिक्यम्—निम्न मन्त्रों और श्लोकों का उच्चारण करके हनुमानजी की आरती करें—

ॐ इदर्ठ० हविः प्रजननं मे अस्तु दशवीरर्ठ० सर्वगणर्ठ० स्वस्तये। आत्मसनि प्रजासनि पशुसनि लोकसनयभयसनि। अग्निः प्रजां बहुलां मे करोत्त्वन्नं पयो रेतो अस्मासु धत्त॥ १॥

ॐ आ रात्रि पार्थिवर्ठ० रजः पितुरप्रायि धामभिः। दिवः सदार्ठ०सि बृहती वि तिष्ठसऽआ त्त्वेषं वर्त्तते तमः॥ २॥

आरती कीजै हनुमान लला की। दुष्टदलन रघुनाथ कला की॥
जाके बल से गिरिवर काँपै। रोग दोष जाके निकट न झाँपै॥
अंजनि पुत्र महा बलदाई। संतन के प्रभु सदा सहाई॥
दे बीरा रघुनाथ पठाये। लंका जारि सीय सुधि लाये॥
लंका सो कोट समुद्र-सी खाई। जात पवनसुत बार न लाई॥
लंका जारि असुर संहारे। सियारामजी के काज सँवारे॥
लक्ष्मण मूर्च्छित पड़े सकारे। आनि सजीवन प्रान उबारे॥

पैठि पताल तोरि जम-कारे। अहिरावन की भुजा उखारे॥
बायें भुजा असुर दल मारे। दहिने भुजा संतजन तारे॥
सुर नर मुनि आरती उतारे। जै जै जै हनुमान उचारे॥
कंचन थार कपूर लौ छाई। आरति करत अंजना माई॥
जो हनुमान (जी) की आरती गावै। बसि बैकुंठ परमपद पावै॥

ॐ कर्पूरगौरं करुणावतरां संसारसारं भुजगेन्द्रहारम्।
सदावसन्तं हृदयारविन्दं भवं भवानीसहितं नमामि॥

सर्वसिद्धिकराय श्रीहनुमते नमः, आर्तिक्यं समर्पयामि।

मन्त्रपुष्पाञ्जलिम्—निम्न मन्त्रों का उच्चारण करके हनुमानजी को मन्त्रपुष्पांजलि प्रदान करें—

ॐ आतिथ्यरूपं मासरं महावीरस्य नग्नहुः।
रूपमुपसदामेतत्तिस्रो रात्रीः सुरासुता॥

ॐ मा नस्तोके तनये मा न ऽआयुषि मा नो गोषुमा नो ऽअश्वेषु रीरिषः। मा नो व्वीरानुरुद्द्र भामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साध्याः सन्ति देवाः॥

ॐ राजाधिराजाय प्रसह्यसाहिने नमो वयं वैश्रवणाय कुर्महे। स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु॥ कुवेराय वैश्रवणाय महाराजाय नमः॥

ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुषान्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति।

तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे। आवीक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति॥

ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन्देव एकः॥

सर्वसिद्धिकराय श्रीहनुमते नमः, मन्त्रपुष्पाञ्जलिं समर्पयामि।

हनुमत्-गायत्री—**ॐ रामदूताय विद्महे वायुपुत्राय धीमहि। तन्नो हनुमद् प्रचोदयात्॥**

प्रदक्षिणाम्—निम्न मन्त्र और श्लोक का उच्चारण करके हनुमानजी की प्रदक्षिणा करें—

ॐ मा नो महान्तमुत मा नो ऽअर्भकं मा न ऽउक्षन्तमुत मा न ऽउक्षितम्। मा नो व्वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्द्र रीरिषः॥

यानि कानि च पापानि जन्मान्तरकृतानि च।
तानि तानि प्रणश्यन्ति प्रदक्षिण पदे पदे॥

सर्वसिद्धिकराय श्रीहनुमते नमः, प्रदक्षिणां समर्पयामि।

प्रणामः

नमो हनुमते तुभ्यं नमो मारुतसूनवे।
नमः श्रीरामभक्ताय श्यामास्याय च ते नमः॥ १॥
नमस्तेऽस्तु महावीर नमस्ते वायुनन्दन।
विलोक्य कृपया नित्यं त्राहि मां भक्तवत्सल॥ २॥
बालैकब्रह्मचर्याय रुद्रमूर्तिधराय च।
विहंगमाय सर्वाय वज्रदेहाय ते नमः॥ ३॥
सीताशोकविनाशाय राममुद्राधराय च।
रावणान्तकुलच्छेदकारिणे ते नमो नमः॥ ४॥

क्षमाप्रार्थना

मन्त्रहीनं क्रियाहीनं भक्तिहीनं कपिश्वर।
यत्पूजितं मया देव! परिपूर्णं तदस्तु मे॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया।
दासोऽयमिति तां मत्वा क्षमस्व कपिश्वर॥
आवाहनं न जानामि न जानामि तवार्चनम्।
पूजां चैव न जानामि क्षमस्व कपिश्वर॥

॥ इति श्रीहनुमत्पूजनम् ॥

हनुमत्सहस्रनामस्तोत्रम्

ऋषय ऊचुः

ऋषे लोहगिरिं प्राप्तः सीताविरहकातरः।
भगवान् किं व्यधाद्-रामस्तत्सर्वं ब्रूहि सत्वरम्॥ १॥

ऋषियों ने वाल्मीकि से कहा—हे भगवन्! सीता के विरह से दुःखी भगवान् श्रीराम किस प्रकार लोहगिरि (ऋष्यमूक पर्वत) पर पधारे। इस सम्पूर्ण वृत्तान्त का वर्णन करने की कृपा करें॥ १॥

श्रीवाल्मीकिरुवाच

मायामानुषदेहोऽयं ददर्शाग्रे कपीश्वरम्।
हनुमन्तं जगत्स्वामी बालाऽर्कसमतेजसम्॥ २॥

श्रीवाल्मीकि ने कहा—उदयकालीन सूर्य के समान तेजस्वी, त्रिलोक-स्वामी, कपीश्वर श्रीहनुमान् के समक्ष परात्पर परब्रह्म परमेश्वर भगवान् श्रीराम ने अपनी मायारूप विग्रह (स्वरूप) का दर्शन कराया॥ २॥

स सत्वरं समागम्य साष्टाङ्गं प्रणिपत्य च।
कृताञ्जलिपुटो भूत्वा हनुमान् राममब्रवीत्॥ ३॥

अपने इष्टदेव के इस स्वरूप का दर्शन करते ही तत्क्षण हूक मारकर उनके चरणों में साष्टांग प्रणाम करते हुए, हाथ जोड़कर श्रीरामजी से हनुमान ने इस प्रकार कहा॥ ३॥

श्रीहनुमानुवाच

धान्योऽस्मि कृतकृत्योऽस्मि दृष्ट्वा तवत्पादपङ्कजम्।
योगिनामप्यगम्यं च संसारभयनाशनम्॥ ४॥

श्रीहनुमानजी ने कहा—योगियों के लिए परम योगतत्त्व द्वारा भी अगम्य, संसाररूपी भय को नष्ट करने वाले, स्वाभीष्ट इन चरणकमल को देखकर आज मैं धन्य एवं कृतकृत्य हो गया॥ ४॥

पुरुषोत्तम देवेश कर्तव्यं निवेद्यताम्।

हे देवादिदेव पुरुषोत्तम! आप आज्ञा प्रदान कीजिए कि मुझे अब क्या करना चाहिए?॥ ४½ ॥

श्रीराम उवाच

जनस्थानं कपिश्रेष्ठ कोऽप्यागत्य विदेहजाम्॥ ५॥
हृतवान् विप्रसंवेशो मारीचानुगते मेयि।
गवेष्य साम्प्रतं वीर जानकीहरणे परः॥ ६॥
त्वया गम्यो न को देशस्त्वं ज्ञानवतां वरः।
सप्तकोटिमहामन्त्रमन्त्रितावयवः प्रभुः॥ ७॥

श्रीराम ने कहा—हे कपीश्वर! मेरी पर्णकुटी में जबकि हम सुवर्णमय मायामृग वध के लिए उसके पीछे जाने पर ब्राह्मण-स्वरूप धारण कर मेरी उस कुटी में आकर विदेह राजपुत्री सीता का अपहरण कर लिया। इसलिए हे वीर! जानकी के अपहरण करने वाले, उस मनुष्य की अति शीघ खोज करो। क्योंकि आप ज्ञानियों में श्रेष्ठ एवं सात करोड़ महामन्त्र से अभिमन्त्रित शरीर वाले, समर्थवान् पुरुष हैं। अतः आपके लिए कोई भी देश अगम्य नहीं है॥ ५-७॥

ऋषय ऊचुः

को मन्त्रः किं च तद्ध्यानं तन्नो ब्रूहि यथार्थतः।
कथासुरधारसं पीत्वा न तृप्यामः परं तप॥ ८॥

ऋषियों ने कहा कि, हे परम तपस्वी! वह मन्त्र तथा ध्यान कौन-सा है, इसका वास्तविक रूप से निरूपण करने की आप कृपा करें। क्योंकि इस कथारूपी अमृतरस का पान कर हमलोगों को तृप्ति नहीं हो रही है॥ ८॥

श्रीवाल्मीकिरुवाच

मन्त्रं हनुमतो विद्धि भुक्तिमुक्तिप्रदायकम्।
महारिष्टमहापापमहादुःखनिवारणम् ॥ ९॥

श्रीवाल्मीकि ने कहा—भुक्ति-मुक्ति प्रदायक एवं महारिष्ट, महापाप, महादुःखों को नष्ट करने वाला 'ॐ ऐं ह्रीं हनुमते रामदूताय' से लेकर 'फट् स्वाहा' तक यह हनुमन्मन्त्र है॥ ९॥

मन्त्रः—**ॐ ऐं ह्रीं हनुमते रामदूताय लङ्काविध्वंसनायाऽञ्जनी-गर्भसम्भूताय शाकिनीडाकिनीध्वंसनाय किलिकिलिबुबुकारेण विभीषणाय हनुमद्देवाय। ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा॥ १०॥**

अन्यं हनुमतो मन्त्रं सहस्रनामसंज्ञितम्।
जानन्ति ऋषयः सर्वे महादुरितनाशनम्॥ ११॥

इसी प्रकार अन्य सहस्रनाम वाले सभी पाप एवं आधि-व्याधि-विनाशक हनुमानजी के मन्त्र को तो समस्त ऋषिगण जानते ही हैं॥ ११॥

यस्य संस्मरणात् सीता लब्धा राज्यमकण्टकम्।
विभीषणाय च ददावात्मानं लब्धवान् मया॥ १२॥

जिस मन्त्र के स्मरण मात्र से ही मैंने अपहरण की हुई सीता को प्राप्त कर विभीषण को अकण्टक राज्य प्रदान किया॥ १२॥

ऋषय ऊचुः

सहस्रनामसन्मन्त्रं दुःखाद्यौघनिवारणम्।
वाल्मीके ब्रूहि नस्तूर्णं शुश्रूषामः कथां पराम्॥ १३॥

ऋषियों ने कहा—हे वाल्मीकि मुनि! आधि-व्याधि सभी दुःखों को नष्ट करने वाले इस सहस्रनाम मन्त्र को बताने की कृपा करें, क्योंकि इस परम उत्कृष्ट कथा श्रवण करने की हम आपके मुखारविन्द द्वारा इच्छा करते हैं॥ १३॥

श्रीवाल्मीकिरुवाच

शृण्वन्तु ऋषयः सर्वे सहस्रनामकं स्तवम्।
स्तवानामुत्तमं दिव्यं सदर्थस्य प्रदायकम्॥ १४॥

श्रीवाल्मीकि ने कहा—हे ऋषिगण! समस्त स्तोत्रों में उत्तम दिव्य स्तोत्र तथा अपने अभीष्ट मनोरथ को पूर्ण करने वाले इस सहस्रनामस्तोत्र का आप लोग श्रवण करें॥ १४॥

विनियोगः—**ॐ अस्य श्रीहनुमत्सहस्रनामस्तोत्रमन्त्रस्य श्रीरामचन्द्र-ऋषिः, अनुष्टुप् छन्दः, श्रीहनुमान् महारुद्रो देवता, ह्रीं श्रीं ह्रौं ह्रां बीजम्, श्रीं इति शक्तिः, किलि-किलि बुबुकारेणेति कीलकम्, लङ्काविध्वंसनेति कवचम्, मम सर्वोपद्रव शान्त्यर्थे सकलकामनासिद्ध्यर्थे च जपे विनियोगः।**

ऋष्यादिन्यासः—**ॐ श्रीरामचन्द्रऋषये नमः, शिरसि। अनुष्टुप्-छन्दसे नमः, मुखे। ह्रौं बीजाय नमः, गुह्ये। श्रीहनुमते कीलकाय नमः, नाभौ। इष्टार्थे विनियोगाय नमः, अञ्जलौ।**

करादिन्यासः—**ॐ ऐं ह्रीं हनुमते रामदूताय अङ्गुष्ठाभ्यां नमः। ॐ लङ्काविध्वंसनाय तर्जनीभ्यां नमः। ॐ अञ्जनीगर्भसम्भूताय मध्यमाभ्यां**

नमः। ॐ शाकिनीडाकिनीविध्वंसनाय अनामिकाभ्यां नमः। ॐ किलिकिलि-बुबुकारेण विभीषणाय हनुमद्देवाय कनिष्ठिकाभ्यां नमः। ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा करतलकरपृष्ठाभ्यां नमः।

हृदयादिन्यासः—ॐ ऐं ह्रीं हनुमते रामदूताय हृदयाय नमः। ॐ लङ्काविध्वंसनाय शिरसे स्वाहा। ॐ अञ्जनीगर्भसम्भूताय शिखायै वषट्। ॐ शाकिनीडाकिनीविध्वंसनाय कवचाय हुम्। ॐ किलिकिलिबुबुकारेण विभीषणाय हनुमद्देवाय नेत्रत्रयाय वौषट्। ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा करतलकरपृष्ठाभ्यां नमः।

ध्यानम्

प्रतप्तस्वर्णवर्णाभं संरक्तारुणलोचनम्।
सुग्रीवादियुतं ध्यायेत् पीताम्बरसमावृतम्॥
गोष्पदीकृतवारीशं पुच्छमस्तकमीश्वरम्।
ज्ञानमुद्रां च बिभ्राणं सर्वालङ्कारभूषितम्॥

भावार्थ—तपे हुए सुवर्ण के समान देदीप्यमान, रक्त नेत्रवाले, पीताम्बरधारी, समुद्र का उल्लंघन करने वाले, मस्तक पर पुच्छ (पोंछ) लपेटे हुए, ज्ञानमुद्रा से सुशोभित एवं समस्त अलंकारों से अलंकृत तथा सुग्रीवादि समस्त वानरगणों से घिरे हुए, सर्व-समर्थ श्रीहनुमानजी का ध्यान करें॥ १४॥

सहस्रनामप्रारम्भः

श्रीरामचन्द्र उवाच

हनुमाञ्श्रीप्रदो वायुपुत्रो रुद्रोऽनघोऽजरः।
अमृत्युर्वीरवीरश्च ग्रामवासो जनाश्रय॥ १॥

श्रीरामचन्द्रजी बोले—१ हनुमान २ श्रीप्रदः ३ वायुपुत्रः ४ रुद्रः ५ अनघः ६ अजरः ७ अमृत्युः ८ वीरवीरः ९ ग्रामवासः १० जनाश्रयः॥ १॥

धनदो निर्गुणोऽकायो वीरो निधिपतिर्मुनिः।
पिङ्गाक्षो वरदो वाग्मी सीताशोकविनाशनः॥ २॥

११ धनदः १२ निर्गुणः १३ अकायः १४ वीरः १५ निधिपतिः १६ मुनिः १७ पिङ्गाक्षः १८ वरदः १९ वाग्मी २० सीताशोकविनाशनः॥ २॥

शिवः सर्वः परोऽव्यक्तो व्यक्ताव्यक्तो रसाधरः।
पिङ्गकेशः पिङ्गरोमा श्रुतिगम्यः सनातनः॥ ३॥

२१ शिवः २२ सर्वः २३ परोः २४ अव्यक्तो २५ व्यक्ताव्यक्तः २६ रसाधरः २७ पिङ्गकेशः २८ पिङ्गरोमा २९ श्रुतिगम्यः ३० सनातनः॥ ३॥

अनादिर्भगवान् देवो विश्वहेतुर्निरामयः।
आरोग्यकर्ता विश्वेशो विश्वनाथो हरीश्वरः॥ ४॥

३१ अनादि ३२ भगवान् ३३ देवः ३४ विश्वहेतुः ३५ निरामयः ३६ आरोग्यकर्त्ता ३७ विश्वेशः ३८ विश्वनाथः ३९ हरीश्वरः॥ ४॥

भर्गो रामो रामभक्तः कल्याणप्रकृतिः स्थिरः।
विश्वम्भरो विश्वमूर्तिर्विश्वाकारोऽथ विश्वपः॥ ५॥

४० भर्गः ४१ रामः ४२ रामभक्तः ४३ कल्याणप्रकृतिः ४४ स्थिरः ४५ विश्वम्भरः ४६ विश्वमूर्तिः ४७ विश्वाकारः ४८ विश्वपः॥ ५॥

विश्वात्मा विश्वसेव्योऽथ विश्वो विश्वहरो रविः।
विश्वचेष्टो विश्वगम्यो विश्वध्येयः कलाधरः॥ ६॥

४९ विश्वात्मा ५० विश्वसेव्यः ५१ विश्वः ५२ विश्वहरः ५३ रविः ५४ विश्वचेष्टः ५५ विश्वगम्यः ५६ विश्वध्येयः ५७ कलाधरः॥ ६॥

प्लवङ्गमः कपिश्रेष्ठो ज्येष्ठो वैद्यो वनेचरः।
बालो वृद्धो युवा तत्त्वं तत्त्वगम्यः सखा ह्यजः॥ ७॥

५८ प्लवङ्गमः ५९ कपिश्रेष्ठः ६० ज्येष्ठः ६१ वैद्यः ६२ वनेचरः ६३ बालः ६४ वृद्धः ६५ युवा ६६ तत्त्वम् ६७ तत्त्वगम्यः ६८ सखा ६९अजः॥ ७॥

अञ्जनासूनुरव्यग्रो ग्रामख्यातो धराधरः।
भूर्भुवः स्वर्महर्लोको जनलोकस्तपोऽव्ययः॥ ८॥

७० अञ्जनासूनु ७१ अव्यग्रो ७२ ग्रामख्यातः ७३ धराधरः ७४ भूः ७५ भुवः ७६ स्वः ७७ महर्लोकः ७८ जनलोक ७९ तपः ८० अव्ययः॥ ८॥

सत्यमोङ्कारगम्यश्च प्रणवो व्यापकोऽमलः।
शिवधर्मप्रतिष्ठाता रामेष्टः फाल्गुनप्रियः॥ ९॥

८१ सत्यम् ८२ ॐकारगम्यः ८३ प्रणवः ८४ व्यापकः ८५ अमलः ८६ शिवधर्मप्रतिष्ठाता ८७ रामेष्टः ८८ फाल्गुनप्रियः॥ ९॥

गोष्पदीकृतवारीशः पूर्णकामो धरापतिः।
रक्षोघ्नः पुण्डरीकाक्षः शरणागतवत्सलः॥ १०॥

८९ गोष्पदीकृतवारीशः ९० पूर्णकामः ९१ धरापतिः ९२ रक्षोघ्नः ९३ पुण्डरीकाक्षः ९४ शरणागतवत्सलः॥ १०॥

जानकीप्राणदाता च रक्षःप्राणापहारकः।
पूर्णः सत्यः पीतवासा दिवाकरसमप्रभः॥ ११॥

९५ जानकीप्राणदाता ९६ रक्षःप्राणापहारकः ९७ पूर्णः ९८ सत्यः ९९ पीतवासाः १०० दिवाकरसमप्रभः॥ ११॥

देवोद्यानविहारी च देवताभयभञ्जनः।
भक्तोदयो भक्तलब्धो भक्तपालनतत्परः॥ १२॥

१०१ देवोद्यानविहारी १०२ देवताभयभञ्जनः १०३ भक्तोदयः १०४ भक्तलब्धः १०५ भक्तपालनतत्परः॥ १२॥

द्रोणहर्ता शक्तिनेता शक्तिराक्षसमारकः।
अक्षघ्नो रामदूतश्च शाकिनीजीवहारकः॥ १३॥

१०६ द्रोणहर्ता १०७ शक्तिनेता १०८ शक्तिराक्षसमारकः १०९ अक्षघ्नः ११० रामदूतः १११ शाकिनीजीवहारकः॥ १३॥

बुबुकारहतारातिर्गर्वपर्वतमर्दनः।
हेतुस्त्वहेतुः प्रांशुश्च विश्वभर्ता जगद्गुरुः॥ १४॥

११२ बुबुकारहतारातिः ११३ गर्वपर्वतमर्दनः ११४ हेतुः ११५ अहेतुः ११६ प्रांशुः ११७ विश्वभर्ता ११८ जगद्गुरुः॥ १४॥

जगन्नेता जगन्नाथो जगदीशो जनेश्वरः।
जगद्धितो हरिः श्रीशो गरुडस्मयभञ्जनः॥ १५॥

११९ जगन्नेता १२० जगन्नाथः १२१ जगदीशः १२२ जनेश्वरः १२३ जगद्धितः १२४ हरिः १२५ श्रीशः १२६ गरुड़स्मयभञ्जनः॥ १५॥

पार्थध्वजो वायुपुत्रोऽमितपुच्छोऽमितविक्रमः।
ब्रह्मपुच्छः परब्रह्मपुच्छो रामेष्टकारकः॥ १६॥

१२७ पार्थध्वजः १२८ वायुपुत्रः १२९ अमितपुच्छः १३० अमितविक्रमः १३१ ब्रह्मपुच्छः १३२ परब्रह्मपुच्छः १३३ रामेष्टकारकः॥ १६॥

सुग्रीवादियुतो ज्ञानी वानरो वानरेश्वरः।
कल्पस्थायी चिरञ्जीवी तपनश्च सदाशिवः॥ १७॥

१३४ सुग्रीवादियुतः १३५ ज्ञानी १३६ वानरः १३७ वानरेश्वरः १३८ कल्पस्थायी १३९ चिरञ्जीवी १४० तपनः १४१ सदाशिवः ॥ १७॥

सन्नतिः सद्गतिर्भुक्तिमुक्तिदः कीर्तिदायकः।
कीर्तिः कीर्तिप्रदश्चैव समुद्रः श्रीपदः शिवः॥ १८॥

१४२ सन्नतः १४३ सद्गतिः १४४ भुक्तिमुक्तिदः १४५ कीर्तिदायकः १४६ कीर्तिः १४७ कीर्तिप्रदः १४८ समुद्रः १४९ श्रीपदः १५० शिवः ॥ १८॥

भक्तोदयो भक्तगम्यो भक्तभाग्यप्रदायकः।
उदधिक्रमणो देवः संसारभयनाशनः॥ १९॥

१५१ भक्तोदयः १५२ भक्तगम्यः १५३ भक्तभाग्यप्रदायकः १५४ उदधिक्रमणः १५५ देवः १५६ संसारभयनाशनः ॥ १९॥

वार्धिबन्धनकृद् विश्वजेता विश्वप्रतिष्ठितः।
लङ्कारिः कालपुरुषो लङ्केशगृहभञ्जनः॥ २०॥

१५७ वार्धिबन्धनकृद् १५८ विश्वजेता १५९ विश्वप्रतिष्ठितः १६० लङ्कारिः १६१ कालपुरुषः १६२ लङ्केशगृहभञ्जनः ॥ २०॥

भूतावासो वासुदेवो वसुस्त्रिभुवनेश्वरः।
श्रीरामरूपः कृष्णास्तु लङ्काप्रासादभञ्जकः॥ २१॥

१६३ भूतावासः १६४ वासुदेवः १६५ वसुः १६६ त्रिभुवनेश्वरः १६७ श्रीरामरूपः १६८ कृष्णः १६९ लङ्काप्रासादभञ्जकः ॥ २१॥

कृष्णः कृष्णस्तुतः शान्तः शान्तिदो विश्वपावनः।
विश्वभोक्ताथ मारघ्नो ब्रह्मचारी जितेन्द्रियः॥ २२॥

१७० कृष्णः १७१ कृष्णस्तुतः १७२ शान्तः १७३ शान्तिदः १७४ विश्वपावनः १७५ विश्वभोक्ता १७६ मारघ्नः १७७ ब्रह्मचारी १७८ जितेन्द्रियः ॥ २२॥

ऊर्ध्वगो लाङ्गुली माली माङ्गूलाहतराक्षसः।
समीरतनुजो वीरो वीरतारो जयप्रदः॥ २३॥

१७९ ऊर्ध्वगः १८० लाङ्गुली १८१ माली १८२ माङ्गूलाहतराक्षसः १८३ समीरतनुजः १८४ वीरः १८५ वीरतारः १८६ जयप्रदः ॥ २३॥

जगन्मङ्गलदः पुण्यः पुण्यश्रवणकीर्तनः।
पुण्यकीर्तिः पुण्यगतिःजगत्पावनपावनः॥ २४॥

१८७ जगन्मङ्गलदः १८८ पुण्यः १८९ पुण्यश्रवणकीर्तनः १९० पुण्यकीर्तिः १९१ पुण्यगतिः १९२ जगत्पावनपावनः॥ २४॥

देवेशो जितमारोऽथ रामभक्तिविधायकः।
ध्याता ध्येयो लयः साक्षी चेता चैतन्यविग्रहः॥ २५॥

१९३ देवेशः १९४ जितमारः १९५ रामभक्तिविधायकः १९६ ध्याता १९७ ध्येयः १९८ लयः १९९ साक्षी २०० चेता २०१ चैतन्यविग्रहः॥ २५॥

ज्ञानदः प्राणदः प्राणो जगत्प्राणः समीरणः।
विभीषणप्रियः शूरः पिप्पलाश्रयसिद्धिदः॥ २६॥

२०२ ज्ञानदः २०३ प्राणदः २०४ प्राणः २०५ जगत्प्राणः २०६ समीरणः २०७ विभीषणप्रियः २०८ शूरः २०९ पिप्पलाश्रयसिद्धिदः॥ २६॥

सिद्धः सिद्धाश्रयः कालो महोक्षः कालजान्तकः।
लङ्केशनिधनस्थायी लङ्कादाहक ईश्वरः॥ २७॥

२१० सिद्धः २११ सिद्धाश्रयः २१२ कालः २१३ महोक्षः २१४ कालजान्तकः २१५ लङ्केशनिधनस्थायी २१६ लङ्कादाहक २१७ ईश्वरः॥ २७॥

चन्द्रसूर्याग्निनेत्रश्च कालाग्निः प्रलयान्तकः।
कपिलः कपिशः पुण्यराशिर्द्वादशराशिगः॥ २८॥

२१८ चन्द्रसूर्याग्निनेत्रः २१९ कालाग्निः २२० प्रलयान्तकः २२१ कपिलः २२२ कपिशः २२३ पुण्यराशिगः २२४ द्वादशराशिगः॥ २८॥

सर्वाश्रयोऽप्रमेयात्मा रेवत्यादिनिवारकः।
लक्ष्मणप्राणदाता च सीताजीवनहेतुकः॥ २९॥

२२५ सर्वाश्रयः २२६ अप्रमेयात्मा २२७ रेवत्यादिनिवारकः २२८ लक्ष्मणप्राणदाता २२९ सीताजीवनहेतुकः॥ २९॥

रामध्येयो हृषीकेशो विष्णुभक्तो जटी बली।
देवारिदर्पहा होता धाता कर्ता जगत्प्रभुः॥ ३०॥

२३० रामध्येयः २३१ हृषीकेशः २३२ विष्णुभक्तः २३३ जटी २३४ बली २३५ देवारिदर्पहा २३६ होता २३७ धाता २३८ कर्ता २३९ जगत्प्रभुः॥ ३०॥

नगरग्रामपालश्च शुद्धो बुद्धो निरत्रपः।
निरञ्जनो निर्विकल्पो गुणातीतो भयंकरः॥ ३१॥

२४० नगरग्रामपालः २४१ शुद्धः २४२ बुद्धः २४३ निरत्रपः २४४ निरञ्जनः २४५ निर्विकल्पः २४६ गुणातीतः २४७ भयंकरः॥ ३१॥

हनुमांश्च दुराराध्यस्तपःसाध्यो महेश्वरः।
जानकीधनशोकोत्थतापहर्ता परात्परः॥ ३२॥

२४८ हनुमान् २४९ दुराराध्यः २५० तपःसाध्यः २५१ महेश्वरः २५२ जानकीधनशोकोत्थतापहर्ता २५३ परात्परः॥ ३२॥

वाङ्मयः सदसद्रूपः कारणं प्रकृतेः परः।
भाग्यदो निर्मलो नेता पुच्छलङ्काविदाहकः॥ ३३॥

२५४ वाङ्मयः २५५ सदसद्रूपः २५६ कारणम् २५७ प्रकृतेः परः २५८ भाग्यदः २५९ निर्मलः २५६० नेता २६१ पुच्छलङ्काविदाहकः॥ ३३॥

पुच्छबद्धयातुधानो यातुधानरिपुप्रियः।
छायापहारी भूतेशो लोकेशः सद्गतिप्रदः॥ ३४॥

२६२ पुच्छबद्धयातुधानः २६३ यातुधानरिपुप्रियः २६४ छायापहारी २६५ भूतेशः २६६ लोकेशः २६७ सद्गतिप्रदः॥ ३४॥

प्लवङ्गमेश्वरः क्रोधः क्रोधसंरक्तलोचनः।
सौम्यो गुरुः काव्यकर्ता भक्तानां च वरप्रदः॥ ३५॥

२६८ प्लवङ्गमेश्वरः २६९ क्रोधः २७० क्रोधसंरक्तलोचनः २७१ सौम्यः २७२ गुरुः २७३ काव्यकर्ता २७४ भक्तानां वरप्रदः॥ ३५॥

भक्तानुकम्पी विश्वेशः पुरुहूतः पुरंदरः।
क्रोधहर्ता तमोहर्ता भक्providedाभयवरप्रदः॥ ३६॥

२७५ भक्तानुकम्पी २७६ विश्वेशः २७७ पुरुहूतः २७८ पुरंदरः २७९ क्रोधहर्ता २८० तमोहर्ता २८१ भक्ताभयवरप्रदः॥ ३६॥

अग्निर्विभावसुर्भास्वान् यमो निर्ऋतिरेव च।
वरुणो वायुगतिमान् वायुः कौबेर ईश्वरः॥ ३७॥

२८२ अग्निः २८३ विभावसुः २८४ भास्वान् २८५ यमः २८६ निर्ऋतिः २८७ वरुणः २८८ वायुगतिमान् २८९ वायुः २९० कौबेर ईश्वरः॥ ३७॥

रविश्चन्द्रः कुजः सौम्यो गुरुः काव्यः शनैश्चरः।
राहुः केतुर्मरुद्धोता दाता हर्ता समीरजः॥ ३८॥

२९१ रविः २९२ चन्द्रः २९३ कुजः २९४ सौम्यः २९५ गुरुः २९६ काव्यः २९७ शनैश्चरः २९८ राहुः २९९ केतुः ३०० मरुत् ३०१ होता ३०२ दाता ३०३ हर्ता ३०४ समीरजः ॥ ३८ ॥

मशकीकृतदेवारिर्दैत्यारिर्मधुसूदनः ।
कामः कपिः कामपालः कपिलो विश्वजीवनः॥ ३९॥

३०५ मशकीकृतदेवारिः ३०६ दैत्यारिः ३०७ मधुसूदनः ३०८ कामः ३०९ कपिः ३१० कामपालः ३११ कपिलः ३१२ विश्वजीवनः ॥ ३९ ॥

भागीरथीपदाम्भोजः सेतुबन्धविशारदः।
स्वाहा स्वधा हविः कव्यं हव्यवाहप्रकाशकः॥ ४०॥

३१३ भागीरथीपदाम्भोजः ३१४ सेतुबन्धविशारदः ३१५ स्वाहा ३१६ स्वधा ३१७ हविः ३१८ कव्यम् ३१९ हव्यवाहप्रकाशकः ॥ ४० ॥

स्वप्रकाशो महावीरो लघुरूर्जितविक्रमः।
उड्डीनोड्डीनगतिमान् सद्गतिः पुरुषोत्तमः॥ ४१॥

३२० स्वप्रकाशः ३२१ महावीरः ३२२ लघुः ३२३ उर्जितविक्रमः ३२४ ३२४ उड्डीनोड्डीनगतिमान् ३२५ सद्गतिः ३२६ पुरुषोत्तमः ॥ ४१ ॥

जगदात्मा जगद्योनिर्जगदन्तो ह्यनन्तकः।
विपाप्मा निष्कलङ्कोऽथ महान् महदहंकृतिः॥ ४२॥

३२७ जगदात्मा ३२८ जगद्योनिः ३२९ जगदन्तः ३३० अनन्तकः ३३१ विपाप्मा ३३२ निष्कलङ्कः ३३३ महान् ३३४ महदहंकृतिः ॥ ४२ ॥

खं वायुः पृथिवी चापो वह्निर्दिक्पाल एव च।
क्षेत्रज्ञः क्षेत्रहर्ता च पल्वलीकृतसागरः॥ ४३॥

३३५ खं ३३६ वायुः ३३७ पृथिवी ३३८ आपः ३३९ वह्निः ३४० दिक्पालः ३४१ क्षेत्रज्ञः ३४२ क्षेत्रहर्ता ३४३ पल्वलीकृतसागरः ॥ ४३ ॥

हिरण्मयः पुराणश्च खेचरो भूचरोऽमरः।
हिरण्यगर्भः सूत्रात्मा राजराजो विशाम्पतिः॥ ४४॥

३४४ हिरण्मयः ३४५ पुराणः ३४६ खेचरः ३४७ भूचरः ३४८ अमरः ३४९ हिरण्यगर्भः ३५० सूत्रात्मा ३५१ विशाम्पतिः राजराजः ॥ ४४ ॥

वेदान्तवेद्य उद्गीथो वेदवेदाङ्गपारगः।
प्रतिग्रामस्थितिः सद्यः स्फूर्तिदाता गुणाकरः॥ ४५॥

३५२ वेदान्तवेद्यः ३५३ उद्गीथः ३५४ वेदवेदाङ्गपारगः ३५५ प्रतिग्रामस्थितिः ३५६ सद्यः स्फूर्तिदाता ३५७ गुणाकरः॥ ४५॥

नक्षत्रमाली भूतात्मा सुरभिः कल्पपादपः।
चिन्तामणिर्गुणनिधिः प्रजाधारो ह्यनुत्तमः॥ ४६॥

३५८ नक्षत्रमाली ३५९ भूतात्मा ३६० सुरभिः ३६१ कल्पपादपः ३६२ चिन्तामणिः ३६३ गुणनिधिः ३६४ प्रजाधारः ३६५ अनुत्तमः॥ ४६॥

पुण्यश्लोकः पुरारातिर्ज्योतिष्माञ्शर्वरीपतिः।
किल्किलारावसंत्रस्तभूतप्रेतपिशाचकः॥ ४७॥

३६६ पुण्यश्लोकः ३६७ पुरारातिः ३६८ ज्योतिष्मान् ३६९ शर्वरीपतिः ३७० किल्किलारावसंत्रस्तभूतप्रेतपिशाचकः॥ ४७॥

ऋणत्रयहरः सूक्ष्मः स्थूलः सर्वगतिः पुमान्।
अपस्मारहरः स्मर्ता श्रुतिर्गाथा स्मृतिर्मनुः॥ ४८॥

३७१ ऋणत्रयहरः ३७२ सूक्ष्मः ३७३ स्थूलः ३७४ सर्वगतिः ३७५ पुमान् ३७६ अपस्मारहरः ३७७ स्मर्ता ३७८ श्रुतिः ३७९ गाथा ३८० स्मृतिः ३८१ मनुः॥ ४८॥

स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं यतीश्वरः।
नादरूपः परं ब्रह्म ब्रह्म ब्रह्मपुरातनः॥ ४९॥

३८२ स्वर्गद्वारम् ३८३ प्रजाद्वारम् ३८४ मोक्षद्वारम् ३८५ यतीश्वरः ३८६ नादरूपः ३८७ परम् ३८८ ब्रह्म ३८९ ब्रह्म ३९० ब्रह्मपुरातनः॥ ४९॥

एकोऽनेको जनः शुक्लः स्वयंज्योतिरनाकुलः।
ज्योतिर्ज्योतिरनादिश्च सात्त्विको राजसस्तमः॥ ५०॥

३९१ एकः ३९२ अनेकः ३९३ जनः ३९४ शुक्लः ३९५ स्वयंज्योतिः ३९६ अनाकुलः ३९७ ज्योतिः ३९८ अनादिर्ज्योतिः ३९९ सात्त्विकः ४०० राजसः ४०१ तमः॥ ५०॥

तमोहर्ता निरालम्बो निराकारो गुणाकरः।
गुणाश्रयो गुणमयो बृहत्कर्मा बृहद्यशाः॥ ५१॥

४०२ तमोहर्ता ४०३ निरालम्बः ४०४ निराकारः ४०५ गुणाकरः ४०६ गुणाश्रयः ४०७ गुणमयः ४०८ बृहत्कर्मा ४०९ बृहद्यशाः ॥ ५१ ॥

बृहद्धनुर्बृहत्पादो बृहन्मूर्धा बृहत्स्वनः।
बृहत्कर्णो बृहन्नासो बृहद्बाहुर्बृहत्तनुः ॥ ५२ ॥

४१० बृहद्धनुः ४११ बृहत्पादः ४१२ बृहन्मूर्धा ४१३ बृहत्स्वनः ४१४ बृहत्कर्णः ४१५ बृहन्नासः ४१६ बृहद्बाहुः ४१७ बृहत्तनुः ॥ ५२ ॥

बृहज्जानुर्बृहत्कार्यो बृहत्पुच्छो बृहत्करः।
बृहद्गतिर्बृहत्सेव्यो बृहल्लोकफलप्रदः ॥ ५३ ॥

४१८ बृहज्जानुः ४१९ बृहत्कार्यः ४२० बृहत्पुच्छः ४२१ बृहत्करः ४२२ बृहद्गति ४२३ बृहत्सेव्यः ४२४ बृहल्लोकफलप्रदः ॥ ५३ ॥

बृहच्छक्तिर्बृहद्वाञ्छाफलदो बृहदीश्वरः।
बृहल्लोकनुतो द्रष्टा विद्यादाता जगद्गुरुः ॥ ५४ ॥

४२५ बृहच्छक्तिः ४२६ बृहद्वाञ्छाफलदः ४२७ बृहदीश्वरः ४२८ बृहल्लोकनुतः ४२९ द्रष्टा ४३० विद्यादाता ४३१ जगद्गुरुः ॥ ५४ ॥

देवाचार्यः सत्यवादी ब्रह्मवादी कलाधरः।
सप्तपातालगामी च मलयाचलसंश्रयः ॥ ५५ ॥

४३२ देवाचार्यः ४३३ सत्यवादी ४३४ ब्रह्मवादी ४३५ कलाधरः ४३६ सप्तपातालगामी ४३७ मलयाचलसंश्रयः ॥ ५५ ॥

उत्तराशास्थितः श्रीदो दिव्यौषधिवशः खगः।
शाखामृगः कपीन्द्रोऽथ पुराणश्रुतिचञ्चुरः ॥ ५६ ॥

४३८ उत्तराशास्थितः ४३९ श्रीदः ४४० दिव्यौषधिवशः ४४१ खगः ४४२ शाखामृगः ४४३ कपीन्द्रः ४४४ पुराणश्रुतिचञ्चुरः ॥ ५६ ॥

चतुरब्राह्मणो योगी योगगम्यः परावरः।
अनादिनिधनो व्यासो वैकुण्ठः पृथिवीपतिः ॥ ५७ ॥

४४५ चतुरब्राह्मणः ४४६ योगी ४४७ योगगम्यः ४४८ परावरः ४४९ अनादिनिधनः ४५० व्यासः ४५१ वैकुण्ठः ४५२ पृथिवीपतिः ॥ ५७ ॥

अपराजितो जितारातिः सदानन्दो दयायुतः।
गोपालो गोपतिर्गोप्ता कलिकालपराशरः ॥ ५८ ॥

४५३ अपराजितः ४५४ जितारातिः ४५५ सदानन्दः ४५६ दयायुतः ४५७ गोपालः ४५८ गोपतिः ४५९ गोप्ता ४६० कलिकालपराशरः ॥ ५८ ॥

मनोवेगी सदायोगी संसारभयनाशनः।
तत्त्वदाताथ तत्त्वज्ञस्तत्त्वं तत्त्वप्रकाशकः॥ ५९॥

४६१ मनोवेगी ४६२ सदायोगी ४६३ संसारभयनाशनः ४६४ तत्त्वदाता ४६५ तत्त्वज्ञः ४६६ तत्त्वम् ४६७ तत्त्वप्रकाशकः॥ ५९॥

शुद्धो बुद्धो नित्यमुक्तो भक्तराजो जयद्रथः।
प्रलयोऽमितमायश्च मायातीतो विमत्सरः॥ ६०॥

४६८ शुद्धः ४६९ बुद्धः ४७० नित्यमुक्तः ४७१ भक्तराजः ४७२ जयद्रथः ४७३ प्रलयः ४७४ अमितमायः ४७५ मायातीतः ४७६ विमत्सरः॥ ६०॥

मायाभर्जितरक्षाश्च मायानिर्मितविष्टपः।
मायाश्रयश्च निर्लेपो मायानिर्वर्तकः सुखम्॥ ६१॥

४७७ मायाभर्जितरक्षा ४७८ मायानिर्मितविष्टपः ४७९ मायाश्रयः ४८० निर्लेपः ४८१ मायानिर्वर्तकः ४८२ सुखम्॥ ६१॥

सुखी सुखप्रदो नागो महेशकृतसंस्तवः।
महेश्वरः सत्यसंधः शरभः कलिपावनः॥ ६२॥

४८३ सुखी ४८४ सुखप्रदः ४८५ नागः ४८६ महेशकृतसंस्तवः ४८७ महेश्वरः ४८८ सत्यसंधः ४८९ शरभः ४९० कलिपावनः॥ ६२॥

सहस्त्रकन्धरबलविध्वंसनविचक्षणः।
सहस्त्रबाहुः सहजो द्विबाहुर्द्विभुजोऽमर॥ ६३॥

४९१ सहस्त्रकन्धरबलविध्वंसनविचक्षणः ४९२ सहस्त्रबाहुः ४९३ सहजः ४९४ द्विबाहुः ४९५ द्विभुजः ४९६ अमरः॥ ६३॥

चतुर्भुजो दशभुजो हयग्रीवः खगाननः।
कपिवक्त्रः कपिपतिर्नरसिंहो महाद्युतिः॥ ६४॥

४९७ चतुर्भुजः ४९८ दशभुजः ४९९ हयग्रीवः ५०० खगाननः ५०१ कपिवक्त्रः ५०२ कपिपतिः ५०३ नरसिंहः ५०४ महाद्युतिः॥ ६४॥

भीषणो भावगो वन्द्यो वराहो वायुरूपधृक्।
लक्ष्मणप्राणदाता च पराजितदशाननः॥ ६५॥

५०५ भीषणः ५०६ भावगः ५०७ वन्द्यः ५०८ वराहः ५०९ वायुरूपधृक् ५१० लक्ष्मणप्राणदाता ५११ पराजितदशाननः॥ ६५॥

पारिजातनिवासी च वटुर्वचनकोविदः।
सुरसास्यविनिर्मुक्तः सिंहिकाप्राणहारकः॥ ६६॥

५१२ पारिजातनिवासी ५१३ वटुः ५१४ वचनकोविदः ५१५ सुरसास्य-विनिर्मुक्तः ५१६ सिंहिकाप्राणहारकः॥ ६६॥

लङ्कालङ्कारविध्वंसी वृषदंशकरूपधृक्।
रात्रिसंचारकुशलो रात्रिंचरगृहाग्निदः॥ ६७॥

५१७ लङ्कालङ्कारविध्वंसी ५१८ वृषदंशकरूपधृक् ५१९ रात्रिसंचारकुशलः ५२० रात्रिंचरगृहाग्निदः॥ ६७॥

किङ्करान्तकरो जम्बुमालिहन्तोग्ररूपधृक्।
आकाशचारी हरिगो मेघनादरणोत्सुकः॥ ६८॥

५२१ किङ्करान्तकरः ५२२ जम्बुमालिहन्ता ५२३ उग्ररूपधृक् ५२४ आकाशचारी ५२५ हरिगः ५२६ मेघनादरणोत्सुकः॥ ६८॥

मेघगम्भीरनिनदो महारावणकुलान्तकः।
कालनेमिप्राणहारी मकरीशापमोक्षदः॥ ६९॥

५२७ मेघगम्भीरनिनदः ५२८ महारावणकुलान्तकः ५२९ कालनेमिप्राणहारी ५३० मकरीशापमोक्षदः॥ ६९॥

रसो रसज्ञः सम्मानो रूपं चक्षुः स्तुतिः खगः।
घ्राणो गन्धः स्पर्शनं च स्पर्शोऽहङ्कारमानगः॥ ७०॥

५३१ रसः ५३२ रसज्ञः ५३३ सम्मानः ५३४ रूपम् ५३५ चक्षुः ५३६ स्तुतिः ५३७ खगः ५३८ घ्राणः ५३९ गन्धः ५४० स्पर्शनम् ५४१ स्पर्शः ५४२ अहंकार मानगः॥ ७०॥

नेतिनेतीतिगम्यश्च वैकुण्ठभजनप्रियः।
गिरीशो गिरिजाकान्तो दुर्वासाः कविरङ्गिराः॥ ७१॥

५४३ नेतिनेतीतिगम्यः ५४४ वैकुण्ठभजनप्रियः ५४५ गिरीशः ५४६ गिरिजाकान्तः ५४७ दुर्वासाः ५४८ कविः ५४९ अङ्गिराः॥ ७१॥

भृगुर्वसिष्ठश्च्यवनो नारदस्तुम्बरोऽमलः।
विश्वक्षेत्रो विश्वबीजो विश्वनेत्रश्च विश्वपः॥ ७२॥

५५०भृगुः ५५१ वसिष्ठः ५५२ च्यवनः ५५३ नारदः ५५४ तुम्बरः ५५५ अमलः ५५६ विश्वक्षेत्रः ५५७ विश्वबीजः ५५८ विश्वनेत्रः ५५९ विश्वपः॥ ७२॥

याजको यजमानश्च पावकः पितरस्तथा।
श्रद्धा बुद्धिः क्षमा तन्द्रा मन्त्रो मन्त्रयिता सुरः॥ ७३॥

५६०याजकः ५६१ यजमानः ५६२ पावकः ५६३ पितरः ५६४ श्रद्धा ५६५ बुद्धिः ५६६ क्षमा ५६७ तन्द्रा ५६८ मन्त्रः ५६९ मन्त्रयिता ५७० सुरः॥ ७३॥

राजेन्द्रो भूपती रुण्डमाली संसारसारथिः।
नित्यसम्पूर्णकामश्च भक्तकामधुगुत्तमः॥ ७४॥

५७१ राजेन्दः ५७२ भूपतीः ५७३ रुण्डमाली ५७४ संसारसारथिः ५७५ नित्यसम्पूर्णकामः ५७६ भक्तकामधुक् ५७७ उत्तमः॥ ७४॥

गणपः केशवो भ्राता पिता माता च मारुतिः।
सहस्रमूर्द्धानेकास्यः सहस्राक्षः सहस्रपात्॥ ७५॥

५७८ गणपः ५७९ केशवः ५८०भ्राता ५८१ पिता ५८२ माता ५८३ मारुतिः ५८४ सहस्रमूर्द्धा ५८५ अनेकास्यः ५८६ सहस्राक्षः ५८७ सहस्रपात्॥ ७५॥

कामजित् कामदहनः कामः कामफलप्रदः।
मुद्रापहारी रक्षोघ्नः क्षितिभारहरो बलः॥ ७६॥

५८८ कामजित् ५८९ कामदहनः ५९० कामः ५९१ कामफलप्रदः ५९२ मुद्रापहारी ५९३ रक्षोघ्नः ५९४ क्षितिभारहरः ५९५ बलः॥ ७६॥

नखदंष्ट्रायुधो विष्णुर्भक्ताभयवरप्रदः।
दर्पहा दर्पदो दंष्ट्राशतमूर्तिरमूर्तिमान्॥ ७७॥

५९६ नखदंष्ट्रायुधः ५९७ विष्णुः ५९८ भक्ताभयवरप्रदः ५९९ दर्पहा ६०० दर्पदः ६०१ दंष्ट्राशतमूर्तिः ६०२ अमूर्तिमान्॥ ७७॥

महानिधिर्महाभागो महाभर्गो महर्द्धिदः।
महाकारो महायोगी महातेजा महाद्युतिः॥ ७८॥

६०३ महानिधिः ६०४ महाभागः ६०५ महाभर्गः ६०६ महर्द्धिदः ६०७ महाकारः ६०८ महायोगी ६०९ महातेजाः ६१० महाद्युतिः॥ ७८॥

महासनो महानादो महामन्त्रो महामतिः।
महागमो महोदारो महादेवात्मको विभुः॥ ७९॥

६११ महासनः ६१२ महानादः ६१३ महामन्त्रः ६१४ महामतिः ६१५ महागमः ६१६ महोदारः ६१७ महादेवात्मकः ६१८ विभुः॥ ७९॥

रौद्रकर्मा क्रूरकर्मा रत्ननाभः कृतागमः।
अम्भोधिलङ्घनः सिंहः सत्यधर्मप्रमोदनः॥ ८०॥

६१९ रौद्रकर्मा ६२० क्रूरकर्मा ६२० रत्ननाभः ६२२ कृतागमः ६२३ अम्भोधिलङ्घनः ६२४ सिंहः ६२५ सत्यधर्मप्रमोदनः॥ ८०॥

जितामित्रो जयः सोमो विजयो वायुनन्दनः।
जीवदाता सहस्रांशुर्मुकुन्दो भूरिदक्षिणः॥ ८१॥

६२६ जितामित्रः ६२७ जयः ६२८ सोमः ६२९ विजयः ६३० वायुनन्दनः ६३१ जीवदाता ६३२ सहस्रांशुः ६३३ मुकुन्दः ६३४ भूरिदक्षिणः॥ ८१॥

सिद्धार्थः सिद्धिदः सिद्धसंकल्पः सिद्धिहेतुकः।
सप्तपातालचरणः सप्तर्षिगणवन्दितः॥ ८२॥

६३५ सिद्धार्थः ६३६ सिद्धिदः ६३७ सिद्धसंकल्पः ६३८ सिद्धिहेतुकः ६३९ सप्तपातालचरणः ६४० सप्तर्षिगणवन्दितः॥ ८२॥

सप्ताब्धिलङ्घनो वीरः सप्तद्वीपोरुमण्डलः।
सप्ताङ्गराज्यसुखदः सप्तमातृनिषेवितः॥ ८३॥

६४१ सप्ताब्धिलङ्घनः ६४२ वीरः ६४३ सप्तद्वीपोरुमण्डलः ६४४ सप्ताङ्गराज्यसुखदः ६४५ सप्तमातृनिषेवितः॥ ८३॥

सप्तस्वर्लोकमुकुटः सप्तहोता स्वराश्रयः।
सप्तच्छन्दोनिधिः सप्तच्छन्दः सप्तजनाश्रयः॥ ८४॥

६४६ सप्तस्वर्लोकमुकुटः ६४७ सप्तहोता ६४८ स्वराश्रयः ६४९ सप्तच्छन्दोनिधिः ६५० सप्तच्छन्दः ६५१ सप्तजनाश्रयः॥ ८४॥

सप्तसामोपगीतश्च सप्तपातालसंश्रयः।
मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः॥ ८५॥

६५२ सप्तसामोपगीतः ६५३ सप्तपातालसंश्रयः ६५४ मेधादः ६५५ कीर्तिदः ६५६ शोकहारी ६५७ दौर्भाग्यनाशनः॥ ८५॥

सर्वरक्षाकरो गर्भदोषहा पुत्रपौत्रदः।
प्रतिवादिमुखस्तम्भो रुष्टचित्तप्रसादनः॥ ८६॥

६५८ सर्वरक्षाकरः ६५९ गर्भदोषहा ६६० पुत्रपौत्रदः ६६१ प्रतिवादिमुखस्तम्भः ६६२ रुष्टचित्तप्रसादनः॥ ८६॥

पराभिचारशमनो दुःखहा बन्धमोक्षदः।
नवद्वारपुराधारो नवद्वारनिकेतनः॥ ८७॥

६६३ पराभिचारशमनो ६६४ दुःखहा ६६५ बन्धमोक्षदः ६६६ नवद्वारपुराधारः ६६७ नवद्वारनिकेतनः॥ ८७॥

नरनारायणस्तुत्यो नवनाथमहेश्वरः।
मेखली कवची खड्गी भ्राजिष्णुर्जिष्णुसारथिः॥ ८८॥

६६८ नरनारायणस्तुत्यः ६६९ नवनाथमहेश्वरः ६७० मेखली ६७१ कवची ६७२ खड्गी ६७३ भ्राजिष्णुः ६७४ जिष्णुसारथिः॥ ८८॥

बहुयोजनविस्तीर्णपुच्छः पुच्छहतासुरः।
दुष्टग्रहनिहन्ता च पिशाचग्रहघातकः॥ ८९॥

६७५ बहुयोजनविस्तीर्णपुच्छः ६७६ पुच्छहतासुरः ६७७ दुष्टग्रहनिहन्ता च ६७८ पिशाचग्रहघातकः॥ ८९॥

बालग्रहविनाशी च धर्मनेता कृपाकरः।
उग्रकृत्यश्चो ग्रवेग उग्रनेत्रः शतक्रतुः॥ ९०॥

६७९ बालग्रहविनाशी ६८० धर्मनेता ६८१ कृपाकरः ६८२ उग्रकृत्यः ६८३ उग्रवेगः ६८४ उग्रनेत्रः ६८५ शतक्रतुः॥ ९०॥

शतमन्युस्तुतः स्तुत्यः स्तुतिः स्तोता महाबलः।
समग्रगुणशाली च व्यग्रो रक्षोविनाशकः॥ ९१॥

६८६ शतमन्युस्तुतः ६८७ स्तुत्यः ६८८ स्तुतिः ६८९ स्तोता ६९० महाबलः ६९१ समग्रगुणशाली ६९२ व्यग्रः ६९३ रक्षोविनाशकः॥ ९१॥

रक्षोऽग्निदाहो ब्रह्मेशः श्रीधरो भक्तवत्सलः।
मेघनादो मेघरूपो मेघवृष्टिनिवारकः॥ ९२॥

६९४ रक्षोऽग्निदाहः ६९५ ब्रह्मेशः ६९६ श्रीधरः ६९७ भक्तवत्सलः ६९८ मेघनादः ६९९ मेघरूपः ७०० मेघवृष्टिनिवारकः॥ ९२॥

मेघजीवनहेतुश्च मेघश्यामः परात्मकः।
समीरतनयो योद्धा तत्त्वविद्याविशारदः॥ ९३॥

७०१ मेघजीवनहेतुः ७०२ मेघश्यामः ७०३ परात्मकः ७०४ समीरतनयः ७०५ योद्धा ७०६ तत्त्वविद्याविशारदः॥ ९३॥

अमोघोऽमोघंदृष्टिश्च इष्टदोऽरिष्टनाशनः।
अर्थोऽनर्थापहारी च समर्थो रामसेवकः॥ ९४॥

७०७ अमोघः ७०८ अमोघदृष्टिः ७०९ इष्टदः ७१० अरिष्टनाशनः ७११ अर्थः ७१२ अनर्थापहारी ७१३ समर्थः ७१४ रामसेवकः॥ ९४॥

अर्थिवन्द्योऽसुराराति: पुण्डरीकाक्ष आत्मभूः।
संकर्षणो विशुद्धात्मा विद्याराशिः सुरेश्वरः॥ ९५॥

७१५अर्थिवन्द्यः ७१६ असुराराति: ७१७ पुण्डरीकाक्षः ७१८ आत्मभूः ७१९ संकर्षणः ७२० विशुद्धात्मा ७२१ विद्याराशिः ७२२ सुरेश्वरः॥ ९५॥

अचलोद्धारको नित्यः सेतुकृद् रामसारथिः।
आनन्दः परमानन्दो मत्स्यः कूर्मो निराश्रयः॥ ९६॥

७२३ अचलोद्धारकः ७२४ नित्यः ७२५ सेतुकृद् ७२६ रामसारथिः ७२७ आनन्दः ७२८ परमानन्दः ७२९ मत्स्यः ७३० कूर्मः ७३१ निराश्रयः॥ ९६॥

वाराहो नारसिंहश्च वामनो जमदग्निजः।
रामः कृष्णः शिवो बुद्धः कल्की रामश्रयो हरिः॥ ९७॥

७३२ वाराहः ७३३ नारसिंहः ७३४ वामनः ७३५ जमदग्निजः ७३६ रामः ७३७ कृष्णः ७३८ शिवः ७३९ बुद्धः ७४० कल्किः ९४१ रामाश्रयः ७४२ हरिः॥ ९७॥

नन्दी भृङ्गी च चण्डी च गणेशो गणसेवितः।
कर्माध्यक्षः सुराध्यक्षो विश्रामो जगतीपतिः॥ ९८॥

७४३ नन्दी ७४४ भृङ्गी ७४५ चण्डी ७४६ गणेशः ७४७ गणसेवितः ७४८ कर्माध्यक्षः ७४९ सुराध्यक्षः ७५० विश्रामः ७५१ जगतीपतिः॥ ९८॥

जगन्नाथः कपीशश्च सर्वावासः सदाश्रयः।
सुग्रीवादिस्तुतो दान्तः सर्वकर्मा प्लवङ्गमः॥ ९९॥

७५२ जगन्नाथः ७५३ कपीशः ७५४ सर्वावासः ७५५ सदाश्रयः ७५६ सुग्रीवादिस्तुतः ७५७ दान्तः ७५८ सर्वकर्मा ७५९ प्लवङ्गमः॥ ९९॥

नखदारितरक्षाश्च नखयुद्धविशारदः।
कुशलः सधनः शेषो वासुकिस्तक्षकस्तथा॥ १००॥

७६० नखदारितरक्षाश्च ७६१ नखयुद्धविशारदः ७६२ कुशलः ७६३ सधनः ७६४ शेषः ७६५ वासुकिः ७६६ तक्षकः॥ १००॥

स्वर्णवर्णो बलाढ्यश्च पुरुजेताघनाशनः।
कैवल्यरूपः कैवल्यो गरुडः पन्नगोरगः॥ १०१॥

७६७ स्व[illegible]वर्णः [illegible]८ बलाढ्यः ७६९ पुरुजेता ७७० अघनाशनः ७७१ कैवल्यरूपः [illegible] ७७३ गरुडः ७७४ पन्नगोरगः ॥ १०१ ॥

किल्किल्[illegible]तारातिगर्वपर्वतभेदनः ।
वज्राङ्गा वज्रदंष्ट्रश्च भक्तवज्रनिवारकः॥ १०२॥

७७५ किल्किल्रावहतारातिः ७७६ गर्वपर्वतभेदनः ७७७ वज्राङ्गः ७७८ वज्रवजः ७७९ भक्तवज्रनिवारकः ॥ १०२ ॥

नखायुधो मणिग्रीवो ज्वालामाली च भास्करः।
प्रौढप्रतापस्तपनो भक्ततापनिवारकः॥ १०३॥

७८० नखायुधः ७८१ मणिग्रीवः ७८२ ज्वालामाली ७८३ भास्करः ७८४ प्रौढप्रतापः ७८५ तपनः ७८६ भक्ततापनिवारकः ॥ १०३ ॥

शरणं जीवनं भोक्ता नानाचेष्टो ह्यचञ्चलः।
स्वस्तिमान् स्वस्तिदो दुःखशातनः पवनात्मजः॥ १०४॥

७८७ शरणम् ७८८ जीवनम् ७८९ भोक्ता ७९० नानाचेष्टः ७९१ अचञ्चलः ७९२ स्वस्तिमान् ७९३ स्वस्तिदः ७९४ दुःखशातनः ७९५ पवनात्मजः ॥ १०४ ॥

पावनः पवनः कान्तो भक्ताङ्गःसहनो बली।
मेघनादरिपुर्मेघनादसंहतराक्षसः॥ १०५॥

७९६ पावनः ७९७ पवनः ७९८ कान्तः ७९९ भक्ताङ्गःसहनः ८०० बली ८०१ मेघनादरिपुः ८०२ मेघनादसंहतराक्षसः ॥ १०५ ॥

क्षरोऽक्षरो विनीतात्मा वानरेशः सतां गतिः।
श्रीकण्ठः शितिकण्ठश्च सहायः सहनायकः॥ १०६॥

८०३ क्षरः ८०४ अक्षरः ८०५ विनीतात्मा ८०६ वानरेशः ८०७ सतां गतिः ८०८ श्रीकण्ठः ८०९ शितिकण्ठः ८१० सहायः ८११ सहनायकः ॥ १०६ ॥

अस्थूलस्त्वनणुर्भर्गो दिव्यः संसृतिनाशनः।
अध्यात्मविद्यासारश्च ह्यध्यात्मकुशलः सुधीः॥ १०७॥

८१२ अस्थूलः ८१३ अनणुः ८१४ भर्गः ८१५ दिव्यः ८१६ संसृतिनाशनः ८१७ अध्यात्मविद्यासारः ८१८ अध्यात्मकुशलः ८१९ सुधीः ॥ १०७ ॥

अकल्मषः सत्यहेतुः सत्यदः सत्यगोचरः।
सत्यगर्भः सत्यरूपः सत्यः सत्यपराक्रमः॥ १०८॥

८२० अकल्मषः ८२१ सत्यहेतुः ८२२ सत्यदः ८२३ सत्यगोचरः ८२४ सत्यगर्भः ८२५ सत्यरूपः ८२६ सत्यः ८२७ सत्यपराक्रमः॥ १०८॥

अञ्जनाप्राणलिङ्गश्च वायुवंशोद्भवः शुभः।
भद्ररूपो रुद्ररूपः सुरूपश्चित्ररूपधृक्॥ १०९॥

८२८ अञ्जनाप्राणलिङ्गः ८२९ वायुवंशोद्भवः ८३० शुभः ८३१ भद्ररूपः ८३२ रुद्ररूपः ८३३ सुरूपः ८३४ चित्ररूपधृक्॥ १०९॥

मैनाकवन्दितः सूक्ष्मदर्शनो विजयोजयः।
क्रान्तदिङ्मण्डलो रुद्रः प्रकटीकृतविक्रमः॥ ११०॥

८३५ मैनाकवन्दितः ८३६ सूक्ष्मदर्शनः ८३७ विजयः ८३८ जयः ८३९ क्रान्तदिङ्मण्डलः ८४० रुद्रः ८४१ प्रकटीकृतविक्रमः॥ ११०॥

कम्बुकण्ठः प्रसन्नात्मा ह्रस्वनासो वृकोदरः।
लम्बौष्ठः कुण्डली चित्रमाली योगविदां वरः॥ १११॥

८४२ कम्बुकण्ठः ८४३ प्रसन्नात्मा ८४४ ह्रस्वनासः ८४५ वृकोदरः ८४६ लम्बौष्ठः ८४७ कुण्डली ८४८ चित्रमाली ८४९ योगविदां वरः॥ १११॥

विपश्चित्कविरानन्दविग्रहोऽनल्पशासनः।
फाल्गुनीसूनुरव्यग्रो योगात्मा योगतत्परः॥ ११२॥

८५० विपश्चित्कविः ८५१ आनन्दविग्रहः ८५२ अनल्पशासनः ८५३ फाल्गुनीसूनु ८५४ अव्यग्रः ८५५ योगात्मा ८५६ योगतत्परः॥ ११२॥

योगविद् योगकर्ता च योगयोनिर्दिगम्बरः।
अकारादिहकारान्तवर्णनिर्मितविग्रहः॥ ११३॥

८५७ योगवित् ८५८ योगकर्ता ८५९ योगयोनिः ८६० दिगम्बरः ८६१ अकारादिहकारान्तवर्णनिर्मितविग्रहः॥ ११३॥

उलूखलमुखः सिद्धसंस्तुतः प्रमथेश्वरः।
श्लिष्टजङ्घः श्लिष्टजानुः श्लिष्टपाणिः शिखाधरः॥ ११४॥

८६२ उलूखलमुखः ८६३ सिद्धसंस्तुतः ८६४ प्रमथेश्वरः ८६५ श्लिष्टजङ्घः ८६६ श्लिष्टजानुः ८६७ श्लिष्टपाणिः ८६८ शिखाधरः॥ ११४॥

सुशर्मामितशर्मा च नारायणपरायणः।
जिष्णुर्भविष्णू रोचिष्णुर्ग्रसिष्णुः स्थाणुरेव च॥ ११५॥

८६९ सुशर्मा ८७० अमितशर्मा ८७१ नारायणपरायणः ८७२ जिष्णुः ८७३ भविष्णुः ८७४ रोचिष्णुः ८७५ ग्रसिष्णुः ८७६ स्थाणुः॥ ११५॥

हरिरुद्रानुसेकोऽथ कम्पनो भूमिकम्पनः।
गुणप्रवाहः सूत्रात्मा वीतरागस्तुतिप्रियः॥ ११६॥

८७७ हरिरुद्रानुसेकः ८७८ कम्पनः ८७९ भूमिकम्पनः ८८० गुणप्रवाहः ८८१ सूत्रात्मा ८८२ वीतरागस्तुतिप्रियः॥ ११६॥

नागकन्याभयध्वंसी रुक्मवर्णः कपालभृत्।
अनाकुलो भवोपायोऽनपायो वेदपारगः॥ ११७॥

८८३ नागकन्याभयध्वंसी ८८४ रुक्मवर्णः ८८५ कपालभृत् ८८६ अनाकुलः ८८७ भवोपायः ८८८ अनपायः ८८९ वेदपारगः॥ ११७॥

अक्षरः पुरुषो लोकनाथ ऋक्षप्रभुर्दृढः।
अष्टाङ्गयोगफलभुक् सत्यसंधः पुरुष्टुतः॥ ११८॥

८९० अक्षरः ८९१ पुरुषः ८९२ लोकनाथ ८९३ ऋक्षप्रभुः ८९४ दृढः ८९५ अष्टाङ्गयोगफलभुक् ८९६ सत्यसंधः ८९७ पुरुष्टुतः॥ ११८॥

श्मशानस्थानलियः प्रेतविद्रावणश्रमः।
पञ्चाक्षरपरः पञ्चमातृको रञ्जनध्वजः॥ ११९॥

८९८ श्मशानस्थानलियः ८९९ प्रेतविद्रावणश्रमः ९०० पञ्चाक्षरपरः ९०१ पञ्चमातृकः ९०२ रञ्जनध्वजः॥ ११९॥

योगिनीवृन्दवन्द्यश्रीः शत्रुघ्नोऽनन्तविक्रमः।
ब्रह्मचारीन्द्रियरिपुर्धृतदण्डो दशात्मकः॥ १२०॥

९०३ योगिनीवृन्दवन्द्यश्रीः ९०४ शत्रुघ्नः ९०५ अनन्तविक्रमः ९०६ ब्रह्मचारी ९०७ इन्द्रियरिपुः ९०८ धृतदण्डः ९०९ दशात्मकः॥ १२०॥

अप्रपञ्चः सदाचारः शूरसेनाविदारकः।
वृद्धः प्रमोद आनन्दः सप्तद्वीपपतिन्धरः॥ १२१॥

९१० अप्रपञ्चः ९११ सदाचारः ९१२ शूरसेनाविदारकः ९१३ वृद्धः ९१४ प्रमोदः ९१५ आनन्दः ९१६ सप्तद्वीपपतिन्धरः॥ १२१॥

नवद्वारपुराधारः प्रत्यग्रः सामगायकः।
षट्चक्रधाम स्वर्लोकाभयकृन्मानदो मदः॥ १२२॥

९१७ नवद्वारपुराधारः ९१८ प्रत्यग्रः ९१९ सामगायकः ९२० षट्चक्रधाम ९२१ स्वर्लोकाभयकृत् ९२२ मानदः ९२३ मदः॥ १२२॥

सर्ववश्यकरः शक्तिरनन्तोऽनन्तमङ्गलः।
अष्टमूर्तिर्नयोपेतो विरूपः सुरसुन्दरः॥ १२३॥

९२४ सर्ववश्यकरः ९२५ शक्तिः ९२६ अनन्तः ९२७ अनन्तमङ्गलः ९२८ अष्टमूर्तिः ९२९ नयोपेतः ९३० विरूपः ९३१ सुरसुन्दरः॥ १२३॥

धूमकेतुर्महाकेतुः सत्यकेतुर्महारथः।
नन्दिप्रियः स्वतन्त्रश्च मेखली डमरुप्रियः॥ १२४॥

९३२ धूमकेतुः ९३३ महाकेतुः ९३४ सत्यकेतुः ९३५ महारथः ९३६ नन्दिप्रिय ९३७ स्वतन्त्रः ९३८ मेखली ९३९ डमरुप्रियः॥ १२४॥

लौहाङ्गः सर्वविद्धन्वी खण्डलः शर्व ईश्वरः।
फलभुक् फलहस्तश्च सर्वकर्मफलप्रदः॥ १२५॥

९४० लौहाङ्गः ९४१ सर्ववित् ९४२ धन्वी ९४३ खण्डलः ९४४ शर्वः ९४५ ईश्वरः ९४६ फलभुक् ९४७ फलहस्तश्च ९४८ सर्वकर्मफलप्रदः॥ १२५॥

धर्माध्यक्षो धर्मपालो धर्मो धर्मप्रदोऽर्थदः।
पञ्चविंशतितत्त्वज्ञस्तारको ब्रह्मतत्परः॥ १२६॥

९४९ धर्माध्यक्षः ९५० धर्मपालः ९५१ धर्मः ९५२ धर्मप्रदः ९५३ अर्थदः ९५४ पञ्चविंशतितत्त्वज्ञः ९५५ तारकः ९५६ ब्रह्मतत्परः॥ १२६॥

त्रिमार्गवसतिर्भीमः सर्वदुःखनिबर्हणः।
ऊर्जस्वान् निष्कलः शूली मौलिर्गर्जन्निशाचरः॥ १२७॥

९५७ त्रिमार्गवसतिः ९५८ भीमः ९५९ सर्वदुःखनिबर्हणः ९६० ऊर्जस्वान् ९६१ निष्कलः ९६२ शूली ९६३ मौलिः ९६४ गर्जन्निशाचरः॥ १२७॥

रक्ताम्बरधरो रक्तो रक्तमाल्यो विभूषणः।
वनमाली शुभाङ्गश्च श्वेतः श्वेताम्बरो युवा॥ १२८॥

९६५ रक्ताम्बरधरः ९६६ रक्तः ९६७ रक्तमाल्यः ९६८ विभूषणः ९६९ वनमाली ९७० शुभाङ्गः ९७१ श्वेतः ९७२ श्वेताम्बरः ९७३ युवा॥ १२८॥

जयोऽजयपरीवारः सहस्रवदनः कपिः।
शाकिनीडाकिनीयक्षरक्षोभूतप्रभञ्जकः ॥ १२९ ॥

९७४ जयः ९७५ अजयपरीवारः ९७६ सहस्रवदनः ९७७ कपिः ९७८ शाकिनीडाकिनीयक्षरक्षोभूतप्रभञ्जकः ॥ १२९ ॥

सद्योजातः कामगतिर्ज्ञानमूर्तिर्यशस्करः।
शम्भुतेजाः सार्वभौमो विष्णुभक्तः प्लवङ्गमः॥ १३० ॥

९७९ सद्योजातः ९८० कामगतिः ९८१ ज्ञानमूर्तिः ९८२ यशस्करः ९८३ शम्भुतेजाः ९८४ सार्वभौमः ९८५ विष्णुभक्तः ९८६ प्लवङ्गमः ॥ १३० ॥

चतुर्नवतिमन्त्रज्ञः पौलस्त्यबलदर्पहा।
सर्वलक्ष्मीप्रदः श्रीमानङ्गदप्रिय ईडितः॥ १३१ ॥

९८७ चतुर्नवतिमन्त्रज्ञः ९८८ पौलस्त्यबलदर्पहा ९८९ सर्वलक्ष्मीप्रदः ९९० श्रीमान् ९९१ अङ्गदप्रिय ९९२ ईडितः ॥ १३१ ॥

स्मृतिबीजं सुरेशानः संसारभयनाशनः।
उत्तमः श्रीपरीवारः श्रितो रुद्रश्च कामधुक्॥ १३२ ॥

९९३ स्मृतिबीजम् ९९४ सुरेशानः ९९५ संसारभयनाशनः ९९६ उत्तमः ९९७ श्रीपरीवारः ९९८ श्रितः ९९९ रुद्रः १००० कामधुक् ॥ १३२ ॥

श्रीवाल्मीकिरुवाच

इति नाम्नां सहस्रेण स्तुतो रामेण वायुभूः।
उवाच तं प्रसन्नात्मा सन्धायायात्मानमव्ययम्॥ १३३ ॥

श्रीवाल्मीकि बोले—इस प्रकार सहस्रनाम के द्वारा श्रीराम ने हनुमानजी की स्तुति की॥ १३३ ॥

श्रीहनुमानुवाच

ध्यानास्पदमिदं ब्रह्म मत्पुरः समुपस्थितम्।
स्वामिन् कृपानिधे राम ज्ञातोऽसि कपिना मया॥ १३४॥
त्वद्ध्याननिरता लोकाः किं न पश्यन्ति सादरम्।
तवागमनहेतुश्च ज्ञातो ह्यत्र मयाऽनघ॥ १३५ ॥

तत्पश्चात् परात्पर परब्रह्म परमेश्वर भगवान् श्रीरामचन्द्रजी का प्रसन्न चित्त हो अपने हृदय में ध्यान कर हनुमानजी ने इस प्रकार कहा—एकमात्र ध्यानैकगम्य

परब्रह्मस्वरूप आप मेरे सम्मुख उपस्थित हुए हैं। हे स्वामिन्! कृपासागर! हे श्रीराम! तुच्छबुद्धि वानरस्वरूप होते हुए भी मैंने आपको पहचान लिया। समस्त चराचर मात्र तो आपके ही ध्यान में निरन्तर रत रहते हैं और आप बड़े ही श्रद्धापूर्वक मेरी स्तुति करते हैं॥ १३४-१३५॥

कर्तव्यं मम किं राम तथा ब्रूहि च राघव!।
इति प्रचोदितो रामः प्रहृष्टात्मेदमब्रवीत्॥ १३६॥

त्रिविध तापपापरहित राघव! इस स्थान पर आपके आने का कारण मैं भलीभाँति समझ गया हूँ। इसलिए हे श्रीराम! मुझे आप निःसंकोच आज्ञा प्रदान कीजिए कि, मैं आपके लिए अब क्या करूँ? इस प्रकार हनुमानजी के कहने पर प्रसन्नचित्त हो, श्रीरामजी ने हनुमानजी से यह कहा— ॥ १३६॥

श्रीराम उवाच

दुर्जयः खलु वैदेहीं गृहीत्वा कोऽपि निर्गतः।
हत्वा तं निर्गुणं वीरमानय त्वं कपीश्वर!॥ १३७॥
मम दास्यं कुरु सखे भव विश्वासकारकः।
तथा कृते त्वया वीर मम कार्यं भविष्यति॥ १३८॥
ओमित्याज्ञां तु शिरसा गृहीत्वा स कपीश्वरः।
विधेयं विधिवत्तच्च चकार शिरसा स्वयम्॥ १३९॥

श्रीरामजी ने कहा—हे कपीश्वर! परमवीर! मैं आपको यही आज्ञा प्रदान करता हूँ कि उस दुष्ट को मारकर शीघ्रातिशीघ्र उसे मेरे सम्मुख ले आओ और उसे मेरे अधीन करो तथा हे मित्र! तुम समस्त प्राणिमात्र को सुख प्रदान करो। हे वीर, आपके इस प्रकार कार्य करने पर मेरा सभी अभीष्ट कार्य सिद्ध होगा। तदुपरान्त कपीश्वर हनुमानजी ने अपने इष्टदेव प्रभु श्रीराम की आज्ञा को शिरोधार्य कर, रुद्रावतार श्रीहनुमानजी ने भलीभाँति सीताजी की खोज की॥ १३७-१३९॥

श्रीवाल्मीकिरुवाच

इदं नाम्नां सहस्रं तु योऽधीते प्रत्यहं नरः।
दुःखौघो नश्यते तस्य सम्पत्तिर्वर्धते चिरम्॥ १४०॥

वाल्मीकिजी ने कहा—इस सहस्रनामस्तोत्र का जो प्राणी प्रतिदिन पाठ करता है, उसके समस्त दुःख नष्ट होते हैं तथा उसकी ऋद्धि-सिद्धि चिरकाल

तक स्थिर रहती है और निःसन्देह धर्म, अर्थ, काम और मोक्ष चतुर्विध पुरुषार्थ उसके अधीन रहते हैं॥ १४०॥

वश्यं चतुर्विधं तस्य भवत्येव न संशयः।
राजानो राजपुत्राश्च राजकार्याश्च मन्त्रिणः॥ १४१॥

प्रतिदिन डेढ़ मास तक इस 'हनुमत्सहस्रनामस्तोत्र' के त्रिकाल पाठ करने से राजा, राजपुत्र, मन्त्रीगण सभी अपने अधीन हो जाते हैं॥ १४१॥

अश्वत्थमूले जपतां नास्ति वैरिकृतं भयम्।
त्रिकालपठनात्तस्य सिद्धिः स्यात् करसंस्थिता॥ १४२॥

पीपल के जड़ पर बैठकर इस स्तोत्र का पाठ करने से शत्रुजन्य भय नष्ट होता है। उसी प्रकार त्रिकाल पाठ करने से सभी सिद्धियाँ प्राप्त होती हैं॥ १४२॥

ब्राह्मे मुहूर्त्ते चोत्थाय प्रत्यहं यः पठेन्नरः।
ऐहिकाऽऽमुष्मिकं सोऽपि लभते नात्र संशयः॥ १४३॥

ब्राह्ममुहूर्त में उठकर जो मनुष्य प्रतिदिन इस स्तोत्र का पाठ करता है, वह निःसंदेह इस लोक में तथा परलोक में सुख को प्राप्त करता है॥ १४३॥

संग्रामे सन्निविष्टानां वैरिविद्रावणं परम्।
ज्वराऽपस्मारशमनं गुल्मादीनां निवारणम्॥ १४४॥

इस स्तोत्र का पाठ करने से युद्ध-स्थल में शत्रुओं को नष्ट कर विजय प्राप्त करता है। उसी प्रकार इस स्तोत्र के पाठ करने से ज्वर, अपस्मार तथा गुल्म आदि सभी रोग नष्ट होते हैं॥ १४४॥

साम्राज्यसुखसम्पत्तिदायकं जपतां नृणाम्।
स्वर्गं मोक्षं समाप्नोति श्रीरामचन्द्रप्रसादतः॥ १४५॥

साम्राज्य, सुख, सम्पत्ति आदि प्राप्त होते हैं और भगवान् श्रीरामचन्द्रजी की कृपा से अन्त में स्वर्ग एवं मोक्ष भी प्राप्त होता है॥ १४५॥

य इदं पठते नित्यं श्रावयेद् वा समाहितः।
सर्वान् कामानवाप्नोति वायुपुत्रप्रसादतः॥ १४६॥

जो मनुष्य इस स्तोत्र का नित्य पाठ करता है और सुनता है वायुपुत्र श्रीहनुमानजी की कृपा से उनके समस्त मनोरथ पूर्ण होते हैं॥ १४६॥

॥ हिन्दी टीका सहित हनुमत्सहस्रनामस्तोत्र पूर्ण हुआ॥

हनुमत्कवचम्

नारद उवाच

एकदा सुखमासीनं शङ्करं लोकशङ्करम्।
पप्रच्छ गिरिजा कान्तं कर्पूरधवलं शिवम्॥ १॥

नारदजी बोले—किसी समय कपूर के समान अत्यन्त शुभ्र वर्ण वाले, संसार का कल्याण करने वाले तथा सुख से बैठे हुए, अपने स्वामी देवाधिदेव शंकर से पार्वती ने पूछा॥ १॥

पार्वत्युवाच

भगवन् देवदेवेश लोकनाथ जगत्प्रभो!।
शोकाकुलानां लोकानां केन रक्षा भवेद् भव॥ २॥
सङ्ग्रामे सङ्कटे घोरे भूतप्रेतादिके भये।
दुःखदावाग्निसन्तप्तचेतसां दुःखभागिनाम्॥ ३॥

पार्वती ने कहा—हे देवदेवेश! हे लोकनाथ! हे जगत्प्रभो! हे भगवन्! संग्राम, घोर संकट तथा भूत-प्रेतादिकों के द्वारा उत्पन्न भय में पड़े हुए, सन्तप्त चित्त वाले मनुष्यों की रक्षा किस स्तोत्र से होती है?॥ २-३॥

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि लोकानां हितकाम्यया।
विभीषणाय रामेण कथितं कवचं पुरा॥ ४॥
कवचं कपिनाथस्य वायुपुत्रस्य धीमतः।
गुह्याद् गुह्यं प्रवक्ष्यामि विशेषात्तव सुन्दरि!॥ ५॥

शिव ने कहा—हे देवि! लोक कल्याण की कामना से भगवान् श्रीराम ने अत्यन्त बुद्धिमान् कपिराज वायुपुत्र का, जो कवच विभीषण को प्रदान किया था और जो अत्यन्त गोपनीय है, उस कवच को मैं तुमसे कहता हूँ॥ ४-५॥

विनियोगः—**ॐ अस्य श्री हनुमत्कवचस्तोत्रमन्त्रस्य, श्रीरामचन्द्र-ऋषिः, श्रीवीरो हनुमान् परमात्मा देवता, अनुष्टुपछन्दः, मारुतात्मज इति बीजम्, अञ्जनीसूनुरिति शक्तिः, लक्ष्मणप्राणदाता इति जीवः श्रीराम-भक्तिरिति कवचम्, लङ्काप्रदाहक इति कीलकम्, मम सकलकार्यसिद्ध्यर्थे जपे विनियोगः।**

मन्त्र—'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः'।

करन्यासः—ॐ ह्रां अङ्गुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां नमः। ॐ ह्रूं मध्यमाभ्यां नमः। ॐ ह्रैं अनामिकाभ्यां नमः। ॐ ह्रौं कनिष्ठिकाभ्यां नमः। ॐ ह्रः करतलकरपृष्ठाभ्यां नमः।

हृदयादिन्यासः—ॐ अञ्जनीसूनवे नमो हृदयाय नमः। ॐ रुद्रमूर्तये नमः, शिरसे स्वाहा। ॐ वातात्मजाय नमः, शिखायै वषट्। ॐ श्रीरामभक्तिरताय नमः, कवचाय हुम्। ॐ वज्र कवचाय नमो, नेत्रत्रयाय वौषट्। ॐ ब्रह्मास्त्रनिवारणाय नमः, अस्त्राय फट्।

ध्यानम्

ध्यायेद् बालदिवाकरद्युतिनिभं देवारिदर्पापहं
देवेन्द्रप्रमुखप्रशस्तयशसं देदीप्यमानं रुचा।
सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं
संरक्तारुणलोचनं पवनजं पीताम्बराऽलङ्कृतम्॥ ६॥

उदय होते हुए बाल सूर्य के तुल्य कान्ति वाले, राक्षसों के गर्व को दूर करने वाले, देवताओं में प्रमुख, उत्तम कीर्ति वाले, तेज से देदीप्यमान, सुग्रीवादि वानरों से युक्त, ब्रह्मतत्त्व का साक्षात् करनेवाले, लाल और अरुण नेत्र वाले, पीताम्बर से अलंकृत श्री हनुमानजी का ध्यान करें॥ ६॥

उद्यन्मार्तण्डकोटिप्रकटरुचियुतं चारुवीरासनस्थं
मौञ्जी यज्ञोपवीताऽऽभरणरुचिशिखाकुण्डलाढ्यम्।
भक्तानामिष्टदानप्रणवमनुदिनं वेदनादप्रमोदं
ध्यायेद्देवं विधेयं प्लवगकुलपतिं गोष्पदीभूतवार्धिम्॥ ७॥

उदय होते हुए करोड़ों सूर्य के तुल्य कान्ति वाले, वीरासन में विराजमान, मौंजी व यज्ञोपवीतरूप आभरण को अत्यन्त स्नेह से धारित करने वाले तथा (सुवर्ण) कुण्डलों से सुशोभित एवं प्रतिदिन अपने भक्तों को अभीष्ट प्रदान करने में निपुण, वेदों के शब्द से अपार हर्ष वाले, वानरों के अधिपति तथा समुद्र को गोपद के सदृश अनायास उल्लंघन करने वाले ऐसे हनुमानजी का ध्यान करें॥ ७॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये॥ ८॥

मन एवं पवन के समान अतिशीघ्रगामी, जितेन्द्रिय, बुद्धिमानों में श्रेष्ठ और वानरों के मुख्य सेनापति, वायुपुत्र, श्रीरामदूत, श्रीहनुमानजी की मैं शरणागत हूँ॥ ८॥

वज्राङ्गं पिङ्गकेशाढ्यं स्वर्णकुण्डलमण्डितम्।
उद्यद्दक्षिणदोर्दण्डं हनुमन्तं विचिन्तये॥ ९॥

जिनका देह वज्र के समान कठोर है, केश पीला है, जो स्वर्ण कुण्डल से सुशोभित हैं, जिनका दाहिना हाथ ऊपर को उठा हुआ है, ऐसे हनुमानजी का मैं ध्यान करता हूँ॥ ९॥

स्फटिकाभं स्वर्णकातिं द्विभुजं च कृताञ्जलिम्।
कुण्डलद्वयसंशोभिमुखाम्भोजं हरिं भजे॥ १०॥

स्वच्छस्फटिक के समान कान्ति वाले, स्वर्ण के समान देदीप्यमान, दो भुजा वाले, अंजलि बाँधे हुए तथा जिनका मुखमण्डल कुण्डलों से सुशोभित है, उन हनुमानजी का मैं ध्यान करता हूँ॥ १०॥

उद्यदादित्यसङ्काशमुदारभुजविक्रमम्।
कन्दर्पकोटिलावण्यं सर्वविद्याविशारदम्॥ ११॥

उदय होते हुए सूर्य की प्रभा वाले, उदार तथा भुजाओं द्वारा पराक्रम दिखाने वाले, करोड़ों कामदेव के सदृश सुन्दर, सभी विद्याओं में विशारद, श्रीहनुमानजी का मैं ध्यान करता हूँ॥ ११॥

श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम्।
अभयं वरदं दोर्भ्यां कलये मारुतात्मजम्॥ १२॥

श्रीराम के हृदय को आनन्दित करने वाले, भक्तों के अभीष्ट पूर्ति के लिए कल्पवृक्ष, अपनी भुजाओं से अभयप्रदान करने वाले, वरदाता, वायुपुत्र श्रीहनुमानजी का मैं ध्यान करता हूँ॥ १२॥

अपराजित नमस्तेऽस्तु नमस्ते रामपूजित।
प्रस्थानं च करिष्यामि सिद्धिर्भवतु मे संदा॥ १३॥

हे अपराजित, हे रामपूजित, मैं तुम्हें नमस्कार करता हूँ। मैं शत्रुओं के विजय से लिए प्रस्थान कर रहा हूँ। सर्वदा मेरा कार्य सिद्ध हो॥ १३॥

यो वारान्निधिमल्पपल्वलमिवोल्लङ्घ्यप्रतापान्वितो
वैदेहीघनशोकतापहरणो वैकुण्ठभक्तप्रियः।
अक्षाद्यूर्जितराक्षसेश्वरमहादर्पापहारी रणे
सोऽयं वानरपुङ्गवोऽवतु सदा चाऽस्मान् समीरात्मजः॥ १४॥

अपार समुद्र को छोटे गड्ढे के तुल्य लाँघने वाले, अत्यन्त पराक्रमशील, वैदेही के अपार शोक-ताप को हरण करने वाले, मर्यादा पुरुषोत्तम भगवान् राम के अत्यन्त प्रिय, संग्राम में महाबली, अक्षयकुमार एवं रावण के अभिमान का मर्दन करने वाले, (ऐसे) वायुपुत्र, वानरों में श्रेष्ठ, श्रीहनुमानजी हम लोगों की रक्षा करें॥ १४॥

वज्राङ्गं पिङ्गनेत्रं कनकमयलसत्कुण्डलाक्रान्तगण्डं
सर्वाविद्याधिनाथं करतलविधृतं पूर्णकुम्भं दृढं च।
भक्ताभीष्टाधिकारं विदधति च सदा सुप्रसन्नं कपीन्द्रम्
त्रैलोक्यत्राणकारं सकलभुवनगं रामदूतं नमामि॥ १५॥

वज्र के समान कठोर शरीर वाले, पिंगल (भूरे) नेत्र वाले, कनकमय कुण्डलों से सुशोभित गण्डस्थल वाले, सम्पूर्ण विद्याओं के अधिपति, हाथ में दृढ़ता से अमृत संयुक्त पूर्ण कुम्भ धारण करने वाले, भक्तों के अभीष्ट पूर्ण करने वाले, सदैव प्रसन्न रहने वाले, वानरों में मुख्य, तीनों लोकों की रक्षा में समर्थ, अबाध गति से सम्पूर्ण विश्व में गमन करने वाले, रामदूत हनुमानजी को मैं नमस्कार करता हूँ॥ १५॥

उद्यल्लाङ्गूलकेशप्रचलजलधरं भीममूर्तिं कपीन्द्रम्।
वन्दे रामाङ्घ्रिपद्मभ्रमरपरिवृतं सत्त्वसारं प्रसन्नम्॥ १६॥

मेघपर्यन्त स्पर्श करने वाली लम्बी पूँछ को हिलाने वाले, भीमकाय, श्रीरामचरणरूपी कमल के भ्रमर, अत्यन्त बलवान्, सदैव प्रसन्न रहने वाले, श्रीहनुमानजी का मैं ध्यान करता हूँ॥ १६॥

वामे करे वीरभयं वहन्तं शैलं च धत्ते निजकण्ठलग्नम्।
उद्यानमुत्थाय सुवर्णवर्णं भजे ज्वलत्कुण्डलरामदूतम्॥ १७॥

बायें हाथ में कण्ठ से लगे हुए वीरों को भय प्रदान करने वाले, पर्वत को धारण किये हुए तथा वैद्य सुषेण द्वारा निर्दिष्ट दाहिने हाथ से देदीप्यमान सुवर्ण वर्ण के स्वयं प्रज्वलित संजीवनी बूटी के पर्वत को उठाये हुए, जगमगाते कुण्डल धारण किए हुए, श्रीरामदूत का मैं ध्यान करता हूँ॥ १७॥

पद्मरागमणिकुण्डलत्विषा पाटलीकृतकपोलमण्डलम्।
दिव्यगेहकदलीवनान्तरे भावयामि पवमाननन्दनम्॥ १८॥

पद्मरागमणि के द्वारा बने हुए कुण्डल की कान्ति से अपने गण्डस्थल को गुलाब के समान रक्त वर्ण बनाने वाले; कदलीवन के दिव्य गृह में निवास करने वाले, पवनात्मज श्रीहनुमानजी का मैं ध्यान करता हूँ॥ १८॥

ॐ ऐं ह्रीं हनुमते रामदूताय शाकिनीडाकिनीविध्वंसनाय किल-किल वामकरेण निषण्णाय हनुमद्देवाय ॐ ह्रीं श्रीं ह्रौं ह्रां स्वाहा।

मन्त्रः—ॐ नमो भगवते हनुमदाख्यरुद्राय सर्वदुष्टजनमुखस्तम्भनं कुरु कुरु ह्रां ह्रीं ह्रूं ठंठंठं हुँ फट् स्वाहा।

ॐ नमो हनुमते अञ्जनीगर्भसम्भूताय रामलक्ष्मणानन्दकराय कपिसैन्य-प्रकाशनाय पर्वतोत्पाटनाय सुग्रीवामात्याय रणपटोद्घाटनाय कुमारब्रह्म-चारिणे गम्भीरभीमशब्दोदयाय ॐ ह्रां ह्रीं ह्रूं सर्वदुष्टनिवारणाय स्वाहा।

ॐ नमो हनुमते सर्वग्रहान् भूतभविष्यद्वर्तमानान् दूरस्थान् समीपस्थान् सर्वकालदुष्टबुद्धीनुच्चाटयोच्चाटय परबलानि क्षोभय-क्षोभय मम सर्वकार्याणि साधय साधय ॐ ह्रां ह्रीं ह्रूं फट् देहि-देहि स्वाहा। शिवं सिद्धिं ह्रूं ह्रीं ह्रीं स्वाहा।

ॐ नमो हनुमते परकृतयन्त्रमन्त्रपराहङ्कारभूतप्रेतपिशाचपरदृष्टिसर्वविघ्न-दुर्जनचेटकविद्यासर्वग्रहभयं निवारय निवारय वध-वध पच-पच दल-दल विचुलु-विचुलु किलु-किलु सर्वयन्त्राणि कुरुष्व वाचं ॐ फट् स्वाहा।

ॐ नमो हनुमते पाहि-पाहि एहि-एहि सर्वग्रहभूतानां शाकिनी-डाकिनीनां विषमदुष्टानां सर्वविषयानाकर्षय सर्वविषयानाकर्षय मर्दय-मर्दय छेदय-छेदय अपमृत्युं ममोपशोषयअपमृत्युं ममोपशोषय ज्वल-ज्वल प्रज्वल-प्रज्वल भूतमण्डलं पिशाचमण्डलं निरासय-निरासय भूतज्वरप्रेत-ज्वरचतुर्थज्वरविषमज्वरमहेशज्वरान् छिन्धि-छिन्धि भिन्धि-भिन्धि अक्षिशूल-पक्षशूलशिरोभ्यन्तरशूलगुल्मशूलपितृशूलब्रह्मराक्षसकुलपरबलनागकुल-विषंनिर्विषंफट् ॐ सर्वदुष्टग्रहनिवारणाय स्वाहा।

ॐ नमो हनुमते पवनपुत्राय वैश्वानरमुखाय पापदृष्टिघोरदृष्टिहनुमदाज्ञा स्फुरेत् स्वाहा।

उपरोक्त 'ॐ ऐं ह्रीं' से आरम्भ कर 'हनुमदाज्ञा स्फुरेत् स्वाहा' तक मन्त्रों का पाठ कर पूर्वोक्त प्रकार से हनुमानजी का ध्यान करें।

श्रीराम उवाच

हनुमान् पूर्वतः पातु दक्षिणे पवनात्मजः।
पातु प्रतीच्यां रक्षोघ्नः पातु सागरपारगः॥ १९॥
उदीच्यामूर्ध्वगः पातु केसरीप्रियनन्दनः।
अधस्ताद् विष्णुभक्तस्तु पातु मध्यं च पावनिः॥ २०॥

अवान्तरदिशः पातु सीताशोकविनाशनः।
लङ्काविदाहकः पातु सर्वापद्भ्यो निरन्तरम्॥ २१॥

श्रीरामजी ने कहा—पूर्व की ओर हनुमान, दक्षिण की ओर पवनात्मज, पश्चिम की ओर रक्षोघ्न तथा उत्तर की ओर सागर-पारग, ऊपर की ओर केसरीनन्दन, नीचे की ओर विष्णुभक्त, मध्य में पावनि, अवान्तर दिशाओं में सीताशोकविनाशन तथा समस्त आपत्तियों से निरन्तर लंकाविदाहक हमारी रक्षा करें॥ १९-२१॥

सुग्रीवसचिवः पातु मस्तकं वायुनन्दनः।
भालं पातु महावीरो भ्रुवोर्मध्ये निरन्तरम्॥ २२॥

सुग्रीव सचिव मेरे मस्तक की, वायुनन्दन भाल की तथा महावीर भौंह के मध्य भाग की निरन्तर रक्षा करें॥ २२॥

नेत्रे च्छायापहारी च पातु नः प्लवगेश्वरः।
कपोले कर्णमूले च पातु श्रीरामकिङ्करः॥ २३॥

छायापहारी (सिंहिका का वध करनेवाले) नेत्रों की, प्लवगेश्वर कपोलों की तथा श्रीरामकिंकर कर्णमूल की रक्षा करें॥ २३॥

नासाग्रमञ्जनीसूनुः पातु वक्त्रं हरीश्वरः।
वाचं रुद्रप्रियः पातु जिह्वां पिङ्गललोचनः॥ २४॥

अंजनीसूनु नासाग्र की, हरीश्वर मुख की, रुद्रप्रिय वाणी की तथा पिंगललोचन हमारी जीभ की रक्षा करें॥ २४॥

पातु दन्तान् फाल्गुनेष्टश्चिबुकं दैत्यपादहा।
पातु कण्ठं च दैत्यारिः स्कन्धौ पातु सुरार्चितः॥ २५॥

अर्जुन के विजय-रथ की ध्वजा में स्थित फाल्गुनेष्ट दाँतों की, दैत्यों को पैर से मारने वाले दैत्य-पादहा चिबुक की, दैत्यारि कण्ठ की तथा देवता से पूजित सुरार्चित मेरे दोनों कन्धों की रक्षा करें॥ २५॥

भुजौ पातु महातेजाः करौ तु चरणायुधः।
नखान् नखायुधः पातु कुक्षिं पातु कपीश्वरः॥ २६॥

महातेजस्वी, महातेजा भुजाओं की, चरणायुध दोनों हाथों की, नखायुध सभी नखों की तथा कपीश्वर कुक्षिभाग की रक्षा करें॥ २६॥

वक्षो मुद्रापहारी च पातु पार्श्वे भुजायुधः।
लङ्काविभञ्जनः पातु पृष्ठदेशे निरन्तरम्॥ २७॥

मुद्रापहारी वक्षःस्थल की, भुजायुध अगल-बगल की तथा लंका का नाश करने वाले लंकाविभंजन निरन्तर मेरे पीठ की रक्षा करें॥ २७॥

नाभिं च रामदूतस्तु कटिं पात्वनिलात्मजः।
गुह्यं पातु महाप्राज्ञो लिङ्गं पातु शिवप्रियः॥ २८॥

रामदूत नाभि की, अनिलात्मज कमर की, महाप्राज्ञ गुदा की तथा शिवप्रिय लिंग की रक्षा करें॥ २८॥

ऊरू च जानुनी पातु लङ्काप्रासादभञ्जनः।
जङ्घे पातु कपिश्रेष्ठो गुल्फौ पातु महाबलः॥ २९॥

लंका को ढाहने वाले लंकाप्रासादभंजन जानु तथा उरु की, कपिश्रेष्ठ जंघा की तथा महाबल दोनों गुल्फों की रक्षा करें॥ २९॥

अचलोद्धारकः पातु पादौ भास्करसन्निभः।
अङ्गान्यमितसत्त्वाढ्यः पातु पादाङ्गुलीस्तथा॥ ३०॥

पर्वत उठाने वाले अचलोद्धारक दोनों पैरों की, सूर्य के समान तेजस्वी, सूर्यसन्निभ अंगों की, अमितपराक्रम वाले अमितसत्त्वाढ्य पैर की अँगुलियों की रक्षा करें॥ ३०॥

सर्वाङ्गानि महाशूरः पातु रोमाणि चात्मवान्।
हनुमत्कवचं यस्तु पठेद् विद्वान् विचक्षणः॥ ३१॥

महाशूर समस्त अंगों की, आत्मवान् समस्त रोम-समूहों की रक्षा करें। इस प्रकार जो विचक्षण विद्वान् इस हनुमत्-कवच का पाठ करते हैं॥ ३१॥

स एव पुरुषश्रेष्ठो भुक्तिं मुक्तिं च विन्दति।
त्रिकालमेककालं वा पठेन्मासत्रयं सदा॥ ३२॥

वे पुरुषश्रेष्ठ ही भुक्ति तथा मुक्ति प्राप्त करते हैं। जो तीनों काल अथवा एक काल में तीन महीने तक इस हनुमत् कवच का पाठ करते हैं॥ ३२॥

सर्वान् रिपून् क्षणाज्जित्वा स पुमान् श्रियमाप्नुयात्।
मध्यरात्रे जले स्थित्वा सप्तवारं पठेद् यदि॥ ३३॥

वे सभी शत्रुओं का क्षणमात्र में जीतकर लक्ष्मी प्राप्त करते हैं। यदि अर्धरात्रि के समय जल में स्थित होकर सात बार इस कवच का पाठ करें॥ ३३॥

क्षयाऽपस्मारकुष्ठादितापज्वरनिवारणम्।
अश्वत्थमूलेऽर्कवारे स्थित्वा पठति यः पुमान्॥ ३४॥

क्षय, अपस्मार, कुष्ठ तथा तिजारी ज्वर का अवश्य नाश होता है। रविवार के दिन जो पुरुष पीपल के नीचे इस कवच का पाठ करता है॥ ३४॥

अचलां श्रियमाप्नोति सङ्ग्रामे विजयं तथा।
लिखित्वा पूजयेद् यस्तु सर्वत्र विजयी भवेत्॥ ३५॥

वह अचल लक्ष्मी तथा संग्राम में विजय प्राप्त करता है। जो इस कवच को लिखकर उसकी पूजा करता है, वह सर्वत्र विजय प्राप्त करता है॥ ३५॥

यः करे धारयेन्नित्यं स पुमान् श्रियमाप्नुयात्।
विवादे द्यूतकाले च द्यूते राजकुले रणे॥ ३६॥
दशवारं पठेद् रात्रौ मिताहारो जितेन्द्रियः।
विजयं लभते लोके मानुषेषु नराधिपः॥ ३७॥

विवाद, द्युत, राजकुल और रण में अल्पाहारपूर्वक जितेन्द्रिय होकर जो रात्रि में दस बार इस कवच का पाठ करता है, वह विजय प्राप्त कर मनुष्यों में राजा होता है॥ ३६-३७॥

भूतप्रेतमहादुर्गे रणे सागरसम्प्लवे।
सिंहव्याघ्रभये चोग्रे शरशस्त्रास्त्रपातने॥ ३८॥
शृङ्खलाबन्धने चैव काराग्रह-नियन्त्रणे।
कायस्तोभे वह्निचक्रे क्षेत्रे घोरे सुदारुणे॥ ३९॥

भूत, प्रेत से घिर जाने पर, महादुःख की अवस्था में, युद्ध में, समुद्र में डूबने, अत्यन्त भयानक सिंह तथा बाघ से भय उत्पन्न होने पर, बाण तथा शस्त्रास्त्र से युद्ध की स्थिति में, लोह से बँधने की स्थिति में तथा कारागार जाने की स्थिति में, शरीर-पीड़ा की स्थिति में, आग लगने की स्थिति में, अत्यन्त भयानक क्षेत्र रक्षण की स्थिति में॥ ३८-३९॥

शोके महारणे चैव ब्रह्मग्रहविनाशनम्।
सर्वदा तु पठेन्नित्यं जयमाप्नोत्यसंशयम्॥ ४०॥

शोक, महारण, ब्रह्मग्रह-आदि में इस कवच का पाठ करने से ब्रह्म-बाधा आदि समस्त दुःख दूर हो जाते हैं। जो सर्वदा इस कवच का पाठ करते हैं, वे निश्चय ही विजय प्राप्त करते हैं॥ ४०॥

भूर्जे वा वसने रक्ते क्षौमे वा तालपत्रके।
त्रिगन्धेनाथ मश्यैव विलिख्य धारयेन्नरः॥ ४१॥

भोजपत्र, रेशमी लाल वस्त्र पर अथवा ताड़पत्र पर इस कवच को त्रिगन्ध स्याही से लिखकर मनुष्यों को यह कवच धारण करना चाहिए॥ ४१॥

पञ्चसप्तत्रिलोहैर्वा गोपितं कवचं शुभम्।
गले कट्यां बाहुमूले कण्ठे शिरसि धारितम्॥ ४२॥
सर्वान् कामानवाप्नोति सत्यं श्रीरामभाषितम्॥ ४३॥

पाँच, सात तथा तीन लोहे की गुटिका में रखकर गले, कटि अथवा बाहु-मूल, कण्ठ या सिर में इस कवच को धारण करने से मनुष्य की समस्त कामनाएँ पूर्ण होती हैं। यह स्वयं ही श्रीराम का कहा हुआ कवच है॥ ४२-४३॥

॥ हिन्दी टीका सहित हनुमत्कवच पूर्ण हुआ॥

पञ्चमुखहनुमत्कवचम्

विनियोगः—ॐ अस्य **श्रीपञ्चमुखहनुमन्मन्त्रस्य, ब्रह्मात्रऋषिः, गायत्रीच्छन्दः, पञ्चमुखविराट् हनुमान् देवता, ह्रीं बीजम्, श्रीं शक्तिः, क्रौं कीलकम्, कूं कवचम्, क्रैं अस्त्राय फट्।**

गरुड उवाच

अथ ध्यानं प्रवक्ष्यामि शृणु सर्वाङ्गसुन्दरम्।
यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम्॥ १॥

गरुड़ जी ने कहा—हे सुन्दरी! देवादिदेव भगवान् (विष्णु) ने अपने प्रिय हनुमान जी का जिस प्रकार ध्यान एवं पूजन आदि किया था, उसका मैं वर्णन करता हूँ, उसे सावधानपूर्वक सुनो॥ १॥

पञ्चवक्त्रं महाभीमं त्रिपञ्चनयनैर्युतम्।
बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदम्॥ २॥

महाभयंकर पाँच मुख तथा पन्द्रह नेत्र एवं भक्तों के समस्त अभीष्टकार्य को करने वाले, दस बाहुओं से युक्त पञ्चवक्त्र हनुमान जी का यह स्वरूप है॥ २॥

पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम्।
दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम्॥ ३॥

जिसमें पूर्व दिशा वाला मुख करोड़ों सूर्य के समान कान्ति एवं भयंकर दाँतों से युक्त तथा क्रोधयुक्त भृकुटी चढ़ी हुई दृष्टिवाला, यह वानर नाम का मुख है ॥ ३ ॥

अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम्।
अत्युग्रतेजोवपुषं भीषणं भयनाशनम्॥ ४॥

उनके दक्षिण ओर के मुख का नाम नारसिंह है, जो कि भयविनाशक, अत्यन्त तेजस्वी शरीर वाला, भयंकर तथा महा अद्भुत है ॥ ४ ॥

पश्चिमं गारुडं वक्त्रं वक्रतुण्डं महाबलम्।
सर्वनागप्रशमनं विषभूतादिकृन्तनम्॥ ५॥

उसी प्रकार महाबलवान् समस्त नागों को शान्त करनेवाला और विष, भूत आदि को नष्ट करनेवाला, टेढ़े मुख वाले हनुमानजी के पश्चिम मुख का नाम गारुडमुख है ॥ ५ ॥

उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोपमम्।
पातालसिंहवेतालज्वररोगादिकृन्तनम् ॥ ६॥

उनके उत्तर दिशा की ओर के मुख का नाम सौकर है, जो कि आकाश के सदृश देदीप्यमान, नील व्रर्ण वाला तथा पाताल, सिंह, बेताल व ज्वरादि रोगों को नष्ट करनेवाला है ॥ ६ ॥

ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम्।
येन वक्त्रेण विप्रेन्द्र तारकाख्यं महासुरम्॥ ७॥

उसी प्रकार भयंकर, दानवों को नष्ट करनेवाला और महाबलवान् तारकासुर का जिस मुख से वध किया था, हे विप्रश्रेष्ठ! ऐसे हनुमानजी के ऊपर की ओर के मुख का नाम हयानन है ॥ ७ ॥

जघान शरणं तत् स्यात् सर्वशत्रुहरं परम्।
ध्यात्वा पञ्चमुखं रुद्रं हनुमन्तं दयानिधिम्॥ ८॥

जो साधक इन रुद्रस्वरूप, दयासागर, पंचमुख वाले हनुमान का ध्यान करते हुए उनकी शरण में जाता है, उसके समस्त शत्रुओं को हनुमानजी नष्ट कर देते हैं ॥ ८ ॥

खड्गं त्रिशूलं खट्वाङ्गं पाशमङ्कुशपर्वतम्।
मुष्टिं कौमोदकीं वृक्षं धारयन्तं कमण्डलुम्॥ ९॥

खड्ग, त्रिशूल, खट्वांग, पाश, अंकुश, पर्वत, मुष्टि, कौमोदकी गदा. वृक्ष तथा कमण्डलु ॥ ९ ॥

भिन्दिपालं ज्ञानमुद्रां दशभिर्मुनिपुङ्गवम्।
एतान्यायुध-जालानि धारयन्तं भजाम्यहम्॥ १०॥
प्रेतासनोपविष्टं तं सर्वाभरणभूषितम्।
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्॥ ११॥

भिन्दिपाल, अस्त्र धारण किये हुए एवं दशों ज्ञानमुद्रा ऋषियों को प्रदर्शित करते हुए, समस्त आभरणों से सुशोभित, शव पर बैठे हुए, दिव्य माला एवं गन्ध लगाए हुए, चारों ओर मुख वाले, आश्चर्यकारी ऐसे हनुमानजी का मैं ध्यान करता हूँ ॥ १०-११ ॥

सर्वाश्चर्यमयं देवं हनुमद्-विश्वतोन्मुखम्।
पञ्चास्यमच्युतमनेकविचित्रवर्णं
वक्त्रं शशाङ्कशिखरं कपिराजवर्यम्।
पिताम्बरादिमुकुटैरुपशोभिताङ्गं
पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि॥ १२॥

स्थिर, अनेक विचित्र वर्ण वाले, चन्द्रमा से सुशोभित मस्तक वाले, कवियों में श्रेष्ठ, पीताम्बर और मुकुट से सुशोभित अंगवाले तथा पीले नेत्रवाले, आदिभूत, पंचमुख वाले हनुमानजी का मैं मन से निरन्तर स्मरण करता हूँ ॥ १२ ॥

मर्कटेशं महोत्साहं सर्वशत्रुहरं परम्।
शत्रुं संहर मां रक्ष श्रीमन्नापदमुद्धर॥ १३॥

हे हनुमन्! आप वानराधिपति, महान् उत्साही एवं समस्त शत्रुओं को नष्ट करनेवाले हैं। अतः आप मेरी रक्षा करें, शत्रुओं का संहार करें और भयंकर आपत्तियों से भी मेरा उद्धार करें ॥ १३ ॥

ॐ हरिमर्कट मर्कट मन्त्रमिदं
परिलिख्यति लिख्यति वामतले।
यदि नश्यति नश्यति शत्रुकुलं
यदि मुञ्चति मुञ्चति वामलता॥ १४॥

यदि साधक 'ॐ हरिमर्कटाय स्वाहा' इस मन्त्र को लिखकर अपनी बाँयीं भुजा में बाँधता है, तो उसके समस्त शत्रु-कुल निश्चय ही नष्ट होते हैं। और अशुभ भी अपनी अशुभता का परित्याग कर शुभ फल प्रदान करता है ॥ १४ ॥

तत्पश्चात् निम्न 'ॐ हरिमर्कटाय स्वाहा' से लेकर 'सकलजनवशंकराय स्वाहा' पर्यन्त का पाठ करे।

ॐ हरि मर्कटाय स्वाहा। ॐ नमो भगवते पञ्चवदनायपूर्वकपि-मुखाय सकलशत्रुसंहारणाय स्वाहा। ॐ नमो भगवते पञ्चवदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूतप्रमथनाय स्वाहा। ॐ नमो भगवते पञ्चवदनाय पश्चिममुखाय गुरुडाननाय सकलविषहराय स्वाहा। ॐ नमो भगवते पञ्चवदनायोत्तरमुखायादिवराहाय सकल-सम्पत्कराय स्वाहा। ॐ नमो भगवते पञ्चवदनायोद्र्ध्वमुखाय हयग्रीवाय सकलजनवशंकराय स्वाहा।

विनियोग:—**ॐ अस्य श्रीपञ्चमुखहनुमन्मन्त्रस्य, श्रीरामचन्द्रऋषि:, अनुष्टुप् छन्द:, पञ्चमुखवीरहनुमान् देवता, हनुमानिति बीजम्, वायुपुत्र इति शक्ति:, अञ्जनीसुत इति कीलकम्, श्रीरामदूतहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोग:।**

करन्यास:—**ॐ अञ्जनीसुताय अङ्गुष्ठाभ्यां नम:। ॐ रुद्रमूर्तये तर्जनीभ्यां नम:। ॐ वायुपुत्राय मध्यमाभ्यां नम:। ॐ अग्निगर्भाय अनामिकाभ्यां नम:। ॐ रामदूताय कनिष्ठिकाभ्यां नम:। ॐ पञ्चमुखहनुमते करतलकरपृष्ठाभ्यां नम:।**

हृदयादिन्यास:—**ॐ अञ्जनीसुताय हृदयाय नम:। ॐ रुद्रमूर्तये शिरसे स्वाहा। ॐ वायुपुत्राय शिखायै वषट्। ॐ अग्निगर्भाय कवचाय हुम्। ॐ रामदूताय नेत्रत्रयाय वौषट्। ॐ पञ्चमुखहनुमते अस्त्राय फट्।**

दिग्बन्ध:—**'ॐ पञ्चमुखहनुमते स्वाहा'।**

ध्यानम्

वन्दे वानरनारसिंहखगराट्क्रोडाश्ववक्त्रान्वितं
दिव्यालङ्करणं त्रिपञ्चनयनं देदीप्यमानं रुचा।
हस्ताऽब्जैरसिखेटपुस्तकसुधाकुम्भाऽङ्कुशाद्रिं हलं
खट्वाङ्गं फणिभूरुहं दशभुजं सर्वारिवीरापहम्॥

दिव्य अलंकारों से सुशोभित, पन्द्रह नेत्रवाले, अपनी कान्ति से ही देदीप्यमान, तलवार, खेट, पुस्तक, अमृतकलश, अंकुश, पर्वत, हल, खट्वांग, सर्प और वृक्ष आदि आयुध अपने दसों कर-कमलों में धारण किये हुए तथा समस्त वीर शत्रुओं को नष्ट करनेवाले, वानर, नृसिंह, गरुड़, वाराह एवं अश्व इन पाँच मुख वाले हनुमानजी को मैं नस्कार करता हूँ।

विनियोगः—**श्रीरामदूतायाऽऽञ्जनेयाय वायुपुत्राय महाबलपराक्रमाय सीतादुःखनिवारणाय लङ्कादहनकरणाय महाबलप्रचण्डाय फाल्गुनसखाय कोलाहलसकलब्रह्माण्डविश्वरूपाय सप्तसमुद्रनिर्लङ्घनाय पिङ्गलनयनायाऽमितविक्रमाय सूर्यबिम्बफलसेवनाय दुष्टनिवारणाय दृष्टिनिरालङ्कृताय सञ्जीविनीसञ्जीविताङ्गदलक्ष्मणमहाकपिसैन्यप्राणदाय दशकण्ठविध्वंसनाय रामेष्टाय महाफाल्गुनसखाय सीतासहितसमवरप्रदाय षट्प्रयोगागमपञ्चमुखवीरहनुमन्मन्त्रजपे विनियोगः।**

दिग्बन्धः—**ॐ हरिमर्कटमर्कटाय बं बं बं बं बं वौषट् स्वाहा। ॐ हरिमर्कटमर्कटाय फं फं फं फं फं फट् स्वाहा। ॐ हरिमर्कटमर्कटाय खें खें खें खें खें मरणाय स्वाहा। ॐ हरिमर्कटमर्कटाय लुं लुं लुं लुं लुं आकर्षितसकलसम्पत्कराय स्वाहा। ॐ हरिमर्कटमर्कटाय धं धं धं धं धं शत्रुस्तम्भनाय स्वाहा। ॐ टं टं टं टं टं कूर्ममूर्तये पञ्चमुखवीरहनुमते परयन्त्रपरतन्त्रोच्चाटनाय स्वाहा। ॐ कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं लं क्षं स्वाहा।**

ॐ पूर्वकपिमुखाय पञ्चमुखहनुमते टं टं टं टं टं सकलशत्रुसंहारणाय स्वाहा। ॐ दक्षिणमुखाय पञ्चमुखाय पञ्चमुखहनुमते करालवदनाय नरसिंहाय ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सकलभूतप्रेतदमनाय स्वाहा। ॐ पश्चिममुखाय गरुडाननाय पञ्चमुखहनुमते मं मं मं मं मं सकलविषहराय स्वाहा। ॐ उत्तरमुखायाऽऽदिवराहाय लं लं लं लं लं नृसिंहाय नीलकण्ठमूर्तये पञ्चमुखहनुमते स्वाहा। ॐ ऊर्ध्वमुखाय हयग्रीवाय रुं रुं रुं रुं रुं रुद्रमूर्तये सकलप्रयोजननिर्वाहकाय स्वाहा। ॐ अञ्जनीसुताय वायुपुत्राय महाबलाय सीताशोकनिवारणाय श्रीरामचन्द्रकृपापादुकाय महावीर्यप्रमथनाय ब्रह्माण्डनाथाय कामदाय पञ्चमुखवीरहनुमते स्वाहा। भूतप्रेतपिशाचब्रह्मराक्षसशाकिनीडाकिन्यन्तरिक्षग्रहपरयन्त्रपरतन्त्रोच्चाटनाय स्वाहा। सकलप्रयोजननिर्वाहकाय पञ्चमुखवीरहनुमते श्रीरामचन्द्रवरप्रसादाय जं जं जं जं जं स्वाहा।

इदं कवचं पठित्वा तु महाकवचं पठेन्नरः।
एकवारं जपेत् स्तोत्रं सर्वशत्रुनिवारणम्॥ १५॥
द्विवारं तु पठेन्नित्यं पुत्रपौत्रप्रवर्धनम्।
त्रिवारं च पठेन्नित्यं सर्वसम्पत्करं शुभम्॥ १६॥

इस कवच का एक बार पाठ करने से समस्त शत्रुनाग, दो बार करने से पुत्र-पौत्रादि की वृद्धि, तीन बार पाठ करने से समस्त सम्पत्ति प्राप्ति होती है॥ १५-१६॥

चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणम्।
पञ्चवारं पठेन्नित्यं सर्वलोकवशङ्करम्॥ १७॥

चार बार पाठ करने से सभी रोगों का नाश, पाँच बार पाठ करने से समस्त प्राणि वश में होते हैं॥ १७॥

षट्वारं पठेन्नित्यं सर्वदेववशङ्करम्।
सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकम्॥ १८॥

छह बार पाठ करने से समस्त देवगण वशीभूत, और सात बार पाठ करने से समस्त सौभाग्य प्राप्ति होती है॥ १८॥

अष्टवारं पठेन्नित्यमिष्टकामार्थसिद्धिदम्।
नववारं पठेन्नित्यं राजभोगमवाप्नुयात्॥ १९॥

आठ बार पाठ करने से इष्ट कार्य की सिद्धि, नौ बार पाठ करने से राज्य सुख की प्राप्ति होती है॥ १९॥

दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम्।
रुद्रावृत्तिं पठेन्नित्यं सर्वसिद्धिर्भवेद् ध्रुवम्॥ २०॥
कवचस्मरणेनैव महाबलमवाप्नुयात्॥ २१॥

दस बार पाठ करने से त्रिलोक ज्ञान की दृष्टि एवं ग्यारह बार पाठ करने से निश्चित ही समस्त कार्य सिद्ध होते हैं और इस कवच के स्मरण मात्र से ही मनुष्य महाबलवान् होता है॥ २०-२१॥

॥ हिन्दी टीका सहित पञ्चमुखहनुमत्कवच पूर्ण हुआ॥

सप्तमुखहनुमत्कवचम्

विनियोगः—ॐ अस्य श्रीसप्तमुखीवीरहनुमत्कवचस्तोत्रमन्त्रस्य, **नारदऋषिः, अनुष्टुप्छन्दः, श्रीसप्तमुखीकपिः, परमात्मा देवता, ह्रां बीजम्, ह्रीं शक्तिः, ह्रूं कीलकम्, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः।**

करन्यासः—ॐ ह्रां अङ्गुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां नमः। ॐ ह्रूं मध्यमाभ्यां नमः। ॐ ह्रैं अनामिकाभ्यां नमः। ॐ ह्रौं कनिष्ठिकाभ्यां नमः। ॐ ह्रः करतलकरपृष्ठाभ्यां नमः।

ध्यानम्

वन्दे वानरसिंहसर्परिपुवाराहाऽश्वगोमानुषै-
र्युक्तं सप्तमुखैः करैर्द्रुमगिरिं चक्रं गदां खेटकम्।
खट्वाङ्गं हलमङ्कुशं फणिसुधाकम्भौ शराब्जाभयान्
शूलं सप्तशिखं दधानममरः सेव्यं कपिं कामदम्॥

अपने करकमलों में वृक्ष, पर्वत, चक्र, गदा, खेटक, खट्वांग, हल, अंकुश, सर्प, अमृतकलश, बाण, कमल, अभय, शूल और अग्नि को धारित किए हुए, सर्वाभीष्टप्रदायक, देवताओं से भी सेवित, वानर, नृसिंह, गरुड़, वाराह, अश्व और मनुष्य इन सात मुख वाले हनुमानजी को मैं नमस्कार करता हूँ।

ब्रह्मोवाच

सप्तशीर्ष्णं प्रवक्ष्यामि कवचं सर्वसिद्धिदम्।
जप्त्वा हनुमतो नित्यं सर्वपापैः प्रमुच्यते॥ १॥

ब्रह्माजी बोले—हे देवगण! सात मुखवाले हनुमानजी के सर्वसिद्धिप्रदायक कवच का मैं वर्णन करता हूँ, जिसका नित्य पाठ करने से मनुष्य त्रिविध ताप व पाप से मुक्त हो जाता है॥ १॥

सप्तस्वर्गपतिः पायाच्छिखां मे मारुतात्मजः।
सप्तमूर्धा शिरोऽव्यान्मे सप्तार्चिर्भालदेशकम्॥ २॥
त्रिःसप्तनेत्रो नेत्रेऽव्यात् सप्तस्वरगतिः श्रुती।
नासां सप्तपदार्थोऽव्यान्मुखं सप्तमुखोऽवतु॥ ३॥

सप्तस्वर्गपति वायुनन्दन मेरे शिखा की, सप्तमूर्धा मस्तक की, सप्तार्चि कपाल की, त्रिसप्तनेत्र की, सप्तस्वरगति दोनों कान की, सप्तपदार्थ नासिका की, सप्तमुख मुख की रक्षा करें॥ २-३॥

सप्तजिह्वस्तु रसनां रदान् सप्तहयोऽवतु।
सप्तच्छन्दो हरिः पातु कण्ठं बाहू गिरिस्थितः॥ ४॥
करौ चतुर्दशकरो भूधरोऽव्यान्ममाङ्गुलीः।
सप्तर्षिध्यातो हृदयमुदरं कुक्षिसागरः॥ ५॥
सप्तद्वीपपतिश्चित्तं सप्तव्याहृतिरूपवान्।
कटिं मे सप्तसंस्थार्थदायकः सक्थिनी मम॥ ६॥

इसी प्रकार सप्तजिह्व जीभ की, सप्तहय दाँत की, सप्तच्छन्दकपि कण्ठ की तथा गिरिस्थित दोनों बाहुओं की, चतुर्दश दोनों हाथों की, भूधर अँगुलियों की, सप्तर्षिध्यात हृदय की, कुक्षिसागर पेट की, सप्तद्वीपपति चित्त की, सप्त-व्याहृति कटिप्रदेश की, सप्तसंस्थार्थदायक मेरे सक्थियों की रक्षा करें॥ ४-६॥

सप्तग्रहस्वरूपी मे जानुनी जङ्घयोस्तथा।
सप्तधान्यप्रियः पादौ सप्तपातालधारकः॥ ७॥
पशून् धनं च धान्यं च लक्ष्मीं लक्ष्मीप्रदोऽवतु।
दारान् पुत्रांश्च कन्याश्च कुटुम्बं विश्वपालकः॥ ८॥

सप्तग्रहस्वरूपी मेरे घुटनों की, सप्तधान्यप्रिय जंघाओं की, सप्तपातालधारक मेरे पैरों की, लक्ष्मीप्रद पशु, धन, धान्य, लक्ष्मी की, विश्वपालक पत्नी, पुत्र, कन्या और कुटुम्ब की रक्षा करें॥ ७-८॥

अनुक्तस्थानमपि मे पायाद् वायुसुतः सदा।
चौरेभ्यो व्यालदंष्ट्रिभ्यः शृङ्गिभ्यो भूतराक्षसात्॥ ९॥
दैत्येभ्योऽप्यथ यक्षेभ्यो ब्रह्मराक्षसजाद् भयात्।
दंष्ट्राकरालवदनो हनुमान् मां सदाऽवतु॥ १०॥

मेरे न कहे गये अंगों की वायुसुत निरन्तर रक्षा करें। उसी प्रकार चोर, सर्प, भयंकर दाँत और सींग वाले पशु, भूत, राक्षसादिगण, दैत्य, यक्ष एवं ब्रह्म-राक्षस द्वारा उत्पन्न भय से दंष्ट्राकरालवदन हनुमानजी हमारी रक्षा करें॥ ९-१०॥

परशस्त्रमन्त्रतन्त्रयन्त्राऽग्निजलविद्युतः।
रुद्रांश शत्रुसङ्ग्रामात् सर्वावस्थासु सर्वभृत्॥ ११॥

शत्रुओं द्वारा चलाये गए शस्त्र, मन्त्र, तन्त्र, यन्त्र आदि व अग्नि, जल, बिजली और शत्रु-संग्राम से रुद्रांश एवं सभी अवस्थाओं में सर्वभृत् कपि मेरी रक्षा करें॥ १०॥

निम्न 'ॐ नमो भगवते सप्तवदनाय' से लेकर 'ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ नमः स्वाहा' तक इस कवच का पाठ करें—

ॐ नमो भगवते सप्तवदनाय आद्यकपिमुखाय वीरहनुमते सर्वशत्रुसंहारणाय ठं ठं ठं ठं ठं ठं ठं ॐ नमः स्वाहा॥ १२॥

ॐ नमो भगवते सप्तवदनाय द्वितीयनारसिंहास्याय अत्युग्रतेजो-वपुषे भीषणाय भयनाशनाय हं हं हं हं हं हं हं ॐ नमः स्वाहा॥ १३॥

ॐ नमो भगवते सप्तवदनाय तृतीयगरुडवक्त्राय वज्रदंष्ट्राय महाबलाय सर्वरोगविनाशनाय मं मं मं मं मं मं मं ॐ नमः स्वाहा॥ १४॥

ॐ नमो भगवते सप्तवदनाय चतुर्थक्रोडतुण्डाय सौमित्रिरक्षकाय पुत्राद्यभिवृद्धिकराय लं लं लं लं लं लं लं ॐ नमः स्वाहा॥ १५॥

ॐ नमो भगवते सप्तवदनाय पञ्चमाश्ववदनाय रुद्रमूर्त्तये सर्ववशी-करणाय सर्वागमस्वरूपाय रुं रुं रुं रुं रुं रुं रुं ॐ नमः स्वाहा॥ १६॥

ॐ नमो भगवते सप्तवदनाय षष्ठगोमुखाय सूर्यरूपाय सर्वरोग-हराय मुक्तिदात्रे ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ नमः स्वाहा॥ १७॥

ॐ नमो भगवते सप्तवदनाय सप्तमानुषमुखाय रुद्रावताराय अञ्जनीसुताय सकलदिग्यशोविस्तारकाय वज्रदेहाय सुग्रीवसाह्यकराय उदधिलङ्घनाय सीताशुद्धिकराय लङ्कादहनाय अनेकराक्षसान्तकाय रामानन्ददायकाय अनेकपर्वतोत्पाटकाय सेतुबन्धकाय कपिसैन्य-नायकाय रावणान्तकाय ब्रह्मचर्याश्रमिणे कौपीनब्रह्मसूत्रधारकाय रामहृदयाय सर्वदुष्टग्रहनिवारणाय शाकिनी-डाकिनी-वेताल-ब्रह्मराक्षस-भैरवग्रह-यक्षग्रह-पिशाचग्रह-ब्रह्मग्रह-क्षत्रियग्रह-वैश्यग्रह-शूद्रग्रहान्त्यजग्रह-म्लेच्छग्रह-सर्पग्रहोच्चाटकाय मम सर्वकार्यसाधकाय सर्वशत्रुसंहारकाय सिंहव्याघ्रादिदुष्ट-सत्त्वाकर्षकायैकाहिकादिविविधज्वरच्छेदकाय परयन्त्र-मन्त्र-तन्त्र-

नाशकाय सर्वव्याधिनिकृन्तकाय सर्पादिसर्वस्थावरजङ्गम-विषस्तम्भनकराय सर्वराजभयचोरभयाऽग्निभय-प्रशमनायाऽऽध्यात्मिकाऽऽधिदैविकाधिभौतिकतापत्रयनिवारणाय सर्वविद्या-सर्वसम्पत्सर्वपुरुषार्थदायकायाऽसाध्यकार्यसाधकाय सर्ववरप्रदाय सर्वाऽभीष्टकराय ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ नमः स्वाहा ॥ १८ ॥

फलश्रुतिः

य इदं कवचं नित्यं सप्तास्यस्य हनूमतः।
त्रिसन्ध्यं जपते नित्यं सर्वशत्रुविनाशनम् ॥ १९ ॥

फलश्रुति—जो इस सप्तमुख हनुमत्कवच का त्रिकाल पाठ करता है, उसके समस्त शत्रु नष्ट हो जाते हैं ॥ १९ ॥

पुत्रपौत्रप्रदं सर्वं सम्पद्-राज्यप्रदं परम्।
सर्वरोगहरं चाऽऽयुःकीर्तिदं पुण्यवर्धनम् ॥ २० ॥

उसे पुत्र, पौत्र आदि की प्राप्ति होती है एवं उसके समस्त असाध्य रोग नष्ट हो जाते हैं व समस्त सम्पत्ति और राज्यसुख का वह उपभोग करता है तथा उसकी आयु, कीर्त्ति एवं पुण्य की निरन्तर वृद्धि होती है ॥ २० ॥

राजानं सवशं नीत्वा त्रैलोक्यविजयी भवेत्।
इदं हि परमं गोप्यं देयं भक्तियुक्ताय च ॥ २१ ॥
न देयं भक्तिहीनाय दत्त्वा स निरयं व्रजेत् ॥ २२ ॥

इस प्रकार से वह प्राणी राजाओं को अपने वश कर तीनों लोकों में विजय प्राप्त करता है। अत्यन्त गुप्त यह कवच श्रद्धा-भक्तिहीन नास्तिक को कदापि प्रदान न करें। यदि अज्ञानवश वह नास्तिक को उपदेश देता है, तो निश्चय ही वह नरकगामी होता है ॥ २१-२२ ॥

नामानि सर्वाण्यपवर्गदानि रूपाणि विश्वानि च यस्य सन्ति।
कर्माणि देवैरपि दुर्घटानि तं मारुतिं सप्तमुखं प्रपद्ये ॥ २३ ॥

जिनके स्वरूप व नाम इस लोक में मोक्ष देने वाले हैं तथा जिनके कार्य अति भयंकर हैं, जिसे कि समस्त देवगण भी करने में असमर्थ हैं, ऐसे सप्तमुख हनुमानजी की मैं शरण में हूँ ॥ २३ ॥

॥ हिन्दी टीका सहित सप्तमुखहनुमत्कवच पूर्ण हुआ ॥

एकादशमुखहनुमत्कवचम्

लोपामुद्रोवाच

कुम्भोद्भव दयासिन्धो श्रुतं हनुमतः प्रभो।
यन्त्रमन्त्रादिकं सर्वं त्वन्मुखोदीरितं मया॥ १॥
दयां कुरु मयि प्राणनाथ वेदितुमुत्सहे।
कवचं वायुपुत्रस्य एकादशमुखात्मनः॥ २॥

अगस्त्य की पत्नी लोपमुद्रा ने महर्षि अगस्त्यजी से कहा—हे दयासागर! कुम्भ से उत्पन्न प्राणनाथ आपने तो मुझे अपने मुख से ही श्री हनुमानजी का यन्त्र, मन्त्र, तन्त्र आदि सभी कुछ बताया। इसके अनन्तर वायुपुत्र एकादश मुख वाले हनुमानजी के कवच जानने की मेरी अपूर्व इच्छा है, जिसे दयापूर्वक आप बताने की कृपा करें॥ १-२॥

इत्येवं श्रुत्वा प्रियायाः प्रश्रयान्वितम्।
वक्तुं प्रचक्रमे तत्र लोपामुद्रां प्रति प्रभुः॥ ३॥

इस प्रकार अपनी प्रिय पत्नी के वचन सुनकर लोपामुद्रा से अगस्त्यजी ने इस प्रकार कहा॥ ३॥

अगस्त्य उवाच

नमस्कृत्वा रामदूतं हनुमन्तं महामतिम्।
ब्रह्मप्रोक्तं तु कवचं श्रृणु सुन्दरि सादरात्॥ ४॥

हे सुन्दरि! सृष्टि रचयिता ब्रह्माजी द्वारा कहे गये एकादश मुखवाले हनुमानजी के कवच का वर्णन मैं करता हूँ, जिसे तुम श्रद्धा-भक्ति से सावधानीपूर्वक सुनो। इस प्रकार कहकर अतुलित बुद्धि वाले रामदूत हनुमानजी को प्रणाम कर, महर्षि अगस्त्यजी ने इस प्रकार कहा॥ ४॥

सनन्दनाय च महच्चतुराननभाषितम्।
कवचं कामदं दिव्यं रक्षःकुलनिबर्हणम्॥ ५॥
सर्वसम्पत्प्रदं पुण्यं मर्त्यानां मधुरस्वरे।

हे प्रिये! चतुर्मुख ब्रह्मा ने समस्त अभीष्टप्रद एवं सम्पूर्ण राक्षसों को नष्ट करनेवाले तथा अणिमादि आठ सिद्धियों को देनेवाले, एकादश मुख वाले श्रीहनुमानजी के पुण्यकारी कवच का वर्णन भगवद्-पार्षद सनन्दनादिकों से मधुर स्वर में इस प्रकार किया॥ ५½॥

ॐ अस्य श्रीकवचस्यैकादशवक्त्रस्य धीमतः॥ ६॥
हनुमत्कवचमन्त्रस्य सनन्दनऋषिः स्मृतः।
प्रसन्नात्मा हनूमांश्च देवताऽत्र प्रकीर्तिता॥ ७॥
छन्दोऽनुष्टुप्समाख्यातं बीजं वायुसुतस्तथा।
मुख्याऽत्र प्राणशक्तिश्च विनियोगः प्रकीर्तितः।
सर्वकामार्थसिद्ध्यर्थे जपे एवमुदीरयेत्॥ ८॥

हे सनन्दनादि महर्षिगण इन एकादशमुख वाले हनुमत्कवच मन्त्र के सनन्दन ऋषि, प्रसन्नचित्त वाले हनुमान देवता, अनुष्टुप् छन्द, वायुसुत बीज एवं मुख्य प्राण शक्ति रूप से हैं, इस प्रकार कहा। साधक को चाहिए कि, वह दाहिने हाथ में जल लेकर 'ॐ अस्य श्रीकवचस्यैकादशवक्त्रस्य' इत्यादि देशकाल का निरूपण करते हुए, 'सर्वकामार्थसिद्ध्यर्थे जपे विनियोगः' तक कहकर भूमि पर जल छोड़ दे॥ ५$\frac{१}{२}$–८॥

तत्पश्चात् निम्न 'स्फ्रें बीजशक्तिधृक् पातु' से आरम्भ कर 'करतल-करपृष्ठाभ्यां नमः' तक पढ़कर करादि तथा हृदयादि षडङ्गन्यास करें—

स्फ्रें बीजशक्तिधृक् पातु शिरो मे पवनात्मजः।
अङ्गुष्ठाभ्यां नमः।
क्रौं बीजात्मा नयनयोः पातु मां वानरेश्वरः।
तर्जनीभ्यां नमः॥ ९॥
ॐ क्षं बीजरूपीकर्णौ मे सीताशोकविनाशनः।
मध्यमाभ्यां नमः।
ॐ ग्लौं बीजवाच्यो नासां मे लक्ष्मणप्राणदायकः।
अनामिकाभ्यां नमः॥ १०॥
ॐ वं बीजार्थश्च कण्ठं मे अक्षयक्षयकारकः।
कनिष्ठिकाभ्यां नमः।
ॐ रां बीजवाच्यो हृदयं पातु मे कपिनायकः।
करतलकरपृष्ठाभ्यां नमः॥ ११॥

कवचारम्भः

ॐ वं बीजकीर्तितः पातु बाहू मे चाऽञ्जनीसुतः।
ॐ ह्रां बीजं राक्षसेन्द्रस्य दर्पहा पातु चोदरम्॥ १२॥

'वं' बीजयुक्त अंजनीसुत मेरे दोनों भुजाओं की, 'ह्रां' बीजयुक्त रावण के अभिमान को नष्ट करनेवाले दर्पहा पेट की ॥ १२ ॥

सौं बीजमयो मध्यं मे पातु लङ्काविदाहकः।
ह्रीं बीजधरो गुह्यं मे पातु देवेन्द्रवन्दितः॥ १३॥

'सौं' बीज संहित लंका-विदाहक नाभि की, 'ह्रीं' बीज वाले देवेन्द्रवन्दित गुप्तांग की ॥ १३ ॥

रं बीजात्मा सदा पातु चोरू मे वार्धिलङ्घनः।
सुग्रीवसचिवः पातु जानुनी मे मनोजवः॥ १४॥

'रं' बीजात्मक वार्धिलंघन दोनों घुटनों की, सुग्रीवमन्त्री मनोजव मेरे जानु की रक्षा करें ॥ १४ ॥

आपादमस्तकं पातु रामदूतो महाबलः।
पूर्वे वानरवक्त्रो मां चाऽग्नेय्यां क्षत्रियान्तकृत्॥ १५॥

इसी प्रकार महाबली रामदूत पैर से मस्तकपर्यन्त मेरे सभी अंगों की रक्षा करें तथा वानरमुख वाले पूर्व दिशा में, परशुराम आकृतिवाले आग्नेय में ॥ १५ ॥

दक्षिणे नारसिंहस्तु नैर्ऋत्यां गणनायकः।
वारुण्यां दिशि मामव्यात् खगवक्त्रो हरीश्वरः॥ १६॥

नारसिंहवक्त्रवाले दक्षिण में, गणेश मुखवाले नैर्ऋत्य में, एवं गरुडमुखवाले कपीश्वर पश्चिम में ॥ १६ ॥

वायव्यां भैरवमुखः कौबेर्यां पातु मे सदा।
क्रोडास्यः पातु मां नित्यमीशान्यां रुद्ररूपधृक्॥ १७॥

भैरव मुखवाले वायव्य में, वाराह मुखवाले उत्तर में तथा रुद्रमुख वाले ईशान दिशा में मेरी निरन्तर रक्षा करें ॥ १७ ॥

रामस्तु पातु मां नित्यं सौम्यरूपी महाभुजः।
एकादशमुखस्यैतद् दिव्यं वै कीर्तितं मया॥ १८॥
रक्षोघ्नं कामदं सौम्यं सर्वसम्पद्विधायकम्।
पुत्रदं धनदं चोग्रं शत्रुसम्पत्तिमर्दनम्॥ १९॥

विशाल बाहुवाले, शान्त-स्वरूप, मर्यादा-पुरुषोत्तम भगवान् राम मेरी निरन्तर रक्षा करें। इस प्रकार मैंने आपसे राक्षसों को नष्ट करनेवाले, सर्वाभीष्टप्रद, सौम्य, सर्वसम्पत्ति-प्रदायक, पुत्र एवं धनप्रद तथा समस्त शत्रु और उनकी सम्पत्तिविनाशक, चिन्तित मनोरथपूर्णकारक ॥ १८-१९ ॥

स्वर्गाऽपवर्गदं दिव्यं चिन्तितार्थप्रदं शुभम्।
एतत् कवचमज्ञात्वा मन्त्रसिद्धिर्न जायते॥ २०॥

स्वर्ग-मोक्षप्रद, एकादश मुखवाले हनुमानजी के इस दिव्य कवच का वर्णन किया। इस कवच को बिना किये किसी भी अवस्था में मन्त्र सिद्धि नहीं होती॥ २०॥

फलश्रुतिः

चत्वारिंशत्सहस्राणि पठेच्छ्रद्धात्मना नरः।
एकवारं पठेन्नित्यं कवचं सिद्धिदं महत्॥ २१॥

फलश्रुति—मनुष्य को चाहिए कि, वह अत्यन्त श्रद्धा-भक्तिपूर्वक चालीस हजार इस कवच का पाठ करे तथा सदैव एक बार पाठ करने से यह कवच सिद्ध होता है॥ २१॥

द्विवारं वा त्रिवारं वा पठेदायुष्यमाप्नुयात्।
क्रमादेकादशादेवमावर्तनकृतात् सुधीः॥ २२॥
वर्षान्ते दर्शनं साक्षाल्लभते नाऽत्र संशयः।

इसी प्रकार दो या तीन बार नित्य पाठ करने से अपमृत्यु (अकाल मृत्यु) का नाश एवं आयुष्य वृद्धिकारक होता है। जो साधक नित्य इस कवच का ग्यारह बार पाठ करता है, उसे निश्चित ही वर्षभर के भीतर निःसन्देह हनुमानजी का साक्षात्कार दर्शन प्राप्त होता है इसमें संशय नहीं॥ २२$\frac{१}{२}$॥

यं यं चिन्तयते कामं तं तं प्राप्नोति पूरुषः।
ब्रह्मोदीरितमेतद्धि तवाऽग्रे कथितं महत्॥ २३॥

साधक जिन-जिन कामनाओं की इच्छा करता है, वे सभी अवश्य ही उसके पूर्ण होते हैं। हे प्रिये! ब्रह्मा ने सनन्दनादि ऋषियों से जिस प्रकार इस कवच का निरूपण किया था, उसे मैंने तुम्हारे समक्ष सम्पूर्ण रूप से कहा॥ २३॥

इत्येवमुक्त्वा कवचं महर्षिस्तूष्णीं बभूवेन्दुमुखीं निरीक्ष्य।
संहृष्टचित्ताऽपि तदा तदीयपादौ ननामाऽतिमुदा स्वभर्तुः॥ २४॥

इस प्रकार महर्षि अगस्त्यजी ने इस कवच का चन्द्रमुखी लोपामुद्रा के समक्ष वर्णन कर मौन हो गए। तत्पश्चात् अत्यन्त प्रसन्न चित्तवाली उस लोपामुद्रा ने अपने परमाराध्य पति अगस्त्यजी के चरणों में अत्यन्त श्रद्धा-भक्ति युक्त हो प्रणाम किया॥ २४॥

॥ हिन्दी टीका सहित एकादशमुखहनुमत्कवच पूर्ण हुआ॥

श्रीहनुमत्स्तोत्रम्

नमो हनुमते तुभ्यं नमो मारुतसूनवे।
नमः श्रीरामभक्ताय श्यामास्याय च ते नमः॥ १॥

हे मारुति के पुत्र हनुमान! आपको नमस्कार है। श्रीराम भक्त आपका अभिवादन है। आपका मुखारविन्द श्यामवर्ण का है, अतः आपको नमस्कार है।

नमो वानरवीराय सुग्रीवसख्यकारिणे।
लङ्काविदाहनार्थाय हेलासागरतारिणे॥ २॥

आप (वाली के छोटे भ्राता) सुग्रीव के साथ (मर्यादा पुरुषोत्तम भगवान् श्रीराम की) मित्रता को स्थापित करवानेवाले और (सुवर्ण की) लंका को भस्म कर देने के विचार से खेल ही खेल में महासमुद्र का लंघन अर्थात् लांघ जानेवाले आप (जैसे) वानरवीर को प्रणाम है।

सीताशोकविनाशाय राममुद्राधराय च।
रावणान्तकुलच्छेदकारिणे ते नमो नमः॥ ३॥

सीता के शोक का विनाश करनेवाले और श्रीराम के द्वारा दी गई अँगूठी को धारण करनेवाले तथा रावण के वंश का संहार करनेवाले आपको बारम्बार प्रणाम है।

मेघनादमखध्वंसकारिणे ते नमो नमः।
अशोकवनविध्वंसकारिणे भयहारिणे॥ ४॥

आपने अशोक वाटिका को नष्ट-भ्रष्ट करके मेघनाद के यज्ञ का विध्वंस कर दिया अतः आप जैसे भयहर्ता को बार-बार नमस्कार है।

वायुपुत्राय वीराय आकाशोदरगामिने।
वनपालशिरश्छेदलङ्काप्रासादभञ्जिने॥ ५॥

आप वायु अर्थात् पवनदेव के पुत्र, श्रेष्ठवीर, आकाश के बीच में भ्रमण करनेवाले तथा अशोक वाटिका के रक्षकों अर्थात् पहरेदारों का शिरच्छेदन करके लंका की (ऊँची-ऊँची) अट्टालिकाओं को नष्ट-भ्रष्ट करनेवाले हैं।

ज्वलत्कनकवर्णाय दीर्घलाङ्गूलधारिणे।
सौमित्रिजयदात्रे च रामदूताय ते नमः॥ ६॥

आपके देहयष्टि की कान्ति तपे हुए सुवर्ण के सदृश स्वरूप की है, आपकी (अति विशाल) लम्बी पूँछ तथा आप (दशरथ की धर्मपत्नी) देवी

सुमित्रा के पुत्र लक्ष्मण को विजय प्रदान करवाने वाले हैं, (आप) जैसे रामदूत को नमस्कार है।

अक्षस्य वधकर्त्रे च ब्रह्मपाशनिवारिणे।
लक्ष्मणाङ्गमहाशक्तिघातक्षतविनाशिने ॥ ७॥
रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय च ते नमः।
ऋक्षवानरवीरौघप्राणदाय नमो नमः॥ ८॥

आपके द्वारा ही अक्षयकुमार का वध हुआ। (ब्रह्मपाश की मर्यादा की रक्षा करते हुए) ब्रह्मपाश को अपने हुंकार से लौटाने में समर्थ, मेघनाद द्वारा प्रयुक्त लक्ष्मणजी के शरीर में महाशक्ति के आघात अर्थात् वार से उत्पन्न हुए घाव के विनाशक होते हुए राक्षस, शत्रु एवं भूत-प्रेतादिकों को नष्ट करनेवाले, भालू-वानर आदि को प्राणदान करनेवाले आपको बारम्बार नमस्कार है।

परसैन्यबलघ्नाय शस्त्रास्त्रघ्नाय ते नमः।
विषघ्नाय द्विषघ्नाय ज्वरघ्नाय च ते नमः॥ ९॥

शत्रु के सैन्य को नष्ट करनेवाले तथा अस्त्रों को विनष्ट करनेवाले, विष, शत्रु और ज्वर को नाश करनेवाले ऐसे आपको बारम्बार नमस्कार है।

महाभयरिपुघ्नाय भक्तत्राणैककारिणे।
परप्रेरितमन्त्राणां यन्त्राणां स्तम्भकारिणे॥ १०॥

महाभय और शत्रुओं का नाश करनेवाले, अपने भक्तों के एकमात्र रक्षक, शत्रुओं के द्वारा प्रेरित, मारण, मोहन, उच्चाटन और वशीकरण आदि मंत्र-यन्त्रों को स्तम्भन करनेवाले।

पयःपाषाणतरणकारणाय नमो नमः।
बालार्कमण्डलग्रासकारिणे भवतारणे॥ ११॥

सेतुबन्धन के समय समुद्र में शिला को तैरानेवाले तथा उदित सूर्यमण्डल को त्रस्त करनेवाले, अपने भक्तों को संसाररूपी भवसागर से पार करनेवाले ऐसे श्रीहनुमानजी को बार-बार नमस्कार है।

नखायुधाय भीमाय दन्तायुधधराय च।
रिपुमायाविनाशाय रामाज्ञालोकरक्षिणे॥ १२॥

भयंकर रूपवाले, नख एवं दाँत रूप प्रधान शस्त्र धारण करनेवाले तथा शत्रु की माया को समूल नष्ट करनेवाले, श्रीराम की आज्ञा का पालन करनेवाले।

प्रतिग्रामस्थितायाऽथ रक्षोभूतवधार्थिने।
करालशैलशस्त्राय द्रुमशस्त्राय ते नमः॥ १३॥

राक्षस एवं भूतगणों का सदैव वध करनेवाले, ग्राम में स्थित रहनेवाले, बड़े-बड़े पर्वत अर्थात् शैलखण्ड एवं वृक्षरूप शस्त्र को धारण करनेवाले यही आपके शस्त्र हैं, ऐसे हनुमानजी को नमस्कार है।

बालैकब्रह्मचर्याय रुद्रमूर्तिधराय च।
विहङ्गमायसर्वाय वज्रदेहाय ते नमः॥ १४॥

बालब्रह्मचारी (एकादश) रुद्र के रूप में अवतरित अर्थात् उत्पन्न होनेवाले तथा आकाश में विचरण करनेवाले जिनका शरीर वज्र तुल्य कठोर है, ऐसे सर्वस्वरूप को प्रणाम है।

कौपीनवाससे तुभ्यं रामभक्तिरताय च।
दक्षिणाशाभास्कराय शतचन्द्रोदयात्मने॥ १५॥

जिनका कौपीन ही वस्त्र है, जो सदैव श्रीराम की भक्ति में संलग्न रहते हैं, दक्षिण दिशा को प्रकाशमान करने के लिए यह सूर्य के तुल्य हैं, सैकड़ों उदय चन्द्र के समान आपके शरीर की कान्ति है।

कृत्याक्षतव्यथाघ्नाय सर्वक्लेशहराय च।
स्वाम्याज्ञापार्थसंग्रामसंख्ये सञ्जयधारिणे॥ १६॥
भक्तान्तदिव्यवादेषु संग्रामे जयदायिने।
किल्किलाबुबुकोच्चारघोरशब्दकराय च॥ १७॥

आप कृत्या (राक्षसी) के द्वारा किये गए आघात की (पूर्ण) व्यथा के नाशक होते हुए समस्त कष्टों के निवारक व (अपने) स्वामी (श्रीराम) की आज्ञा से पृथा के पुत्र अर्जुन के युद्ध में मैत्रीभाव के संस्थापक व अपने स्वामी (श्रीराम) की आज्ञा अनुसार अनेक युद्ध में प्रवृत्त होनेवाले, सत्यमार्ग में स्थित, सर्वदों विजय करानेवाले। अपने भक्तों के समस्त व्यवहार एवं वाद-विवाह और संग्राम में विजय प्राप्त करानेवाले, आकस्मिक भयंकर 'किलकिला' और 'बुबुक' का उच्चारण कर भीषण शब्द करनेवाले।

सर्पाग्निव्याधिसंस्तम्भकारिणे वनचारिणे।
सदा वनफलाहारसंतृप्ताय विशेषतः।
महार्णवशिलाबद्धसेतुबन्धाय ते नमः॥ १८॥

सर्प, अग्नि एवं व्याधि का स्तम्भन करनेवाले वन में रहनेवाले सदैव जंगली फलों का आहार के रूप में भक्षण करनेवाले, विशेष रूप से लंका में जाने के लिए समुद्र में पत्थर तैराकर पुल बनाने वाले श्रीहनुमानजी को नमस्कार है।

वादे विवादे संग्रामे भये घोरे महावने।
सिंहव्याघ्रादिचौरेभ्यः स्तोत्रपाठाद् भयं न हि॥ १९॥

वाद-विवाद, संग्राम, भयंकर भय, सिंह, चोर तथा बाघ आदि द्वारा उत्पन्न भय इस हनुमत्स्तोत्र के पाठ करने से नष्ट होते हैं।

दिव्यभूतभये व्याधौ विषे स्थावरजङ्गमे।
राजशस्त्रभये चोग्रे तथा ग्रहभयेषु च॥ २०॥
जले सर्वे महावृष्टौ दुर्भिक्षे प्राणसम्प्लवे।
पठेत् स्तोत्रं प्रमुच्येत भयेभ्यः सर्वतो नरः॥ २१॥

उसी प्रकार भूत-प्रेतादि, व्याघ्र, विष और समस्त चराचर से उत्पन्न भय एवं भयंकर राजभय-शस्त्रभय, ग्रहभय तथा जल, सर्प, महावृष्टि, दुर्भिक्ष, प्राणसंकट आदि समस्त भयों से इस स्तोत्र का पाठ करनेवाला मनुष्य छुटकारा पा जाता है।

तस्य क्वापि भयं नास्ति हनुमत्स्तवपाठतः।
सर्वदा वै त्रिकालं च पठनीयमिदं स्तवम्।
सर्वान् कामानवाप्नोति नाऽत्र कार्या विचारणा॥ २२॥

इस हनुमत्स्तोत्र का तीनों कालों अर्थात् प्रातः, मध्याह्न और सन्ध्या के समय निरन्तर पाठ करनेवाले मनुष्य को कभी भी भय नहीं होता। ऐसा करने से (मनुष्य) की सभी कामनाएँ पूर्ण होती हैं। अतः इसमें विचार नहीं करना चाहिए।

विभीषणकृतं स्तोत्रं तार्क्ष्येण समुदीरितम्।
ये पठिष्यन्ति भक्त्या वै सिद्धयस्तत्करे स्थिताः॥ २३॥

(निःसंदेह रावण के छोटे भ्राता) विभीषण के द्वारा रचे हुए इस स्तोत्र का (भगवान् विष्णु के वाहन) गरुडदेव ने सम्यक् प्रकार से पाठ किया था। अतः जो मनुष्य (इस पृथ्वीलोक में) परमभक्ति से इस स्तोत्र का पाठ करेगा, उसको समस्त सिद्धियाँ उसके हस्तगत हो जायेंगी।

॥ श्रीहनुमत्स्तोत्रं सम्पूर्णम् ॥

श्रीमारुतिस्तोत्रम्

ॐ नमो वायुपुत्राय भीमरूपाय धीमते।
नमस्ते रामदूताय कामरूपाय श्रीमते॥ १॥
मोहशोकविनाशाय सीताशोकविनाशिने।
भग्नाशोकवनायास्तु दग्धलङ्काय वाग्मिने॥ २॥

ॐ भयंकर रूपों को धारण करनेवाले, बुद्धिमान् वायु अर्थात् पवनदेव के पुत्र हनुमान को नमस्कार है। जो अपनी इच्छानुसार रूपधारण करने में समर्थ होते हुए मोह और शोक को नष्ट करने वाले हैं, जो सीताजी के शोक के निवारक, अशोक वाटिका को नष्ट करनेवाले, लंका को भस्म करनेवाले तथा बोलने में कुशलवक्ता हैं, ऐसे उन श्रीमान् रामदूत को नमस्कार है।

गतिनिर्जितवाताय लक्ष्मणप्राणदाय च।
वनौकसां वरिष्ठाय वशिने वनवासिने॥ ३॥

जिन्होंने अपनी गति से वायु को भी पराजित कर दिया, जो लक्ष्मण के प्राणदाता, वानरों में श्रेष्ठ, जितेन्द्रिय और वन में रहने वाले हैं।

तत्त्वज्ञानसुधासिन्धुनिमग्नाय महीयसे।
आञ्जनेयाय शूराय सुग्रीवसचिवाय ते॥ ४॥

तत्वज्ञानरूपी सुधा के सागर में निमग्न, महान् ऐश्वर्यशाली और सुग्रीव के सचिव हैं, उन शूरवीर (माता) अंजना के पुत्र को प्रणाम है।

जन्ममृत्युभयघ्नाय सर्वक्लेशहराय च।
नेदिष्ठाय प्रेत-भूत-पिशाचभयहारिणे॥ ५॥

जो जन्म-मृत्युरूपी भय के विध्वंसक होते हुए भी सभी कष्टों को नष्ट करनेवाले हैं, जो परम निकटवर्ती, भूत-प्रेत और पिशाच के भय को दूर करनेवाले हैं।

यातनानाशनायास्तु नमो मर्कटरूपिणे।
यक्ष-राक्षस-शार्दूल-सर्प-वृश्चिकभीहृते॥ ६॥

(समस्त प्रकार की) पीड़ा के नाशक तथा यक्ष, राक्षस, सिंह, सर्प और बिच्छू के भय को नष्ट करने वाले हैं। उन वानररूपधारी हनुमानजी का (मैं) अभिवादन करता हूँ।

महाबलाय वीराय चिरंजीविन उद्धते।
हारिणे वज्रदेहाय चोल्लङ्घितमहाब्धये॥ ७॥

जो (अति महान) महासागर को लाङ्घ जाने वाले तथा अहङ्कार से युक्त अहंकारियों के गर्व को नष्ट करने वाले, चिरञ्जीवी और बलवानों में (सभी से) अग्रगण्य हैं। जिनकी देहयष्टि वज्र के समान कठोर है।

बलिनामग्रगण्याय नमो नः पाहि मारुते।
लाभदोऽसि त्वमेवाशु हनुमन् राक्षसान्तक॥ ८॥

हे पवनदेव के पुत्र, हमारी रक्षा कीजिए, राक्षसों के लिए जो कालस्वरूप हनुमान आप (यथा) शीघ्र ही लाभ प्रदत्त करने वाले हैं। उन महाबलवान् वीरवर हनुमानजी को नमस्कार है।

यशो जयं च मे देहि शत्रून् नाशय नाशय।
स्वाश्रितानामभयदं य एवं स्तौति मारुतिम्।
हानिः कुतो भवेत्तस्य सर्वत्र विजयी भवेत्॥ ९॥

इसलिए मुझे यश और विजय प्रदान करते हुए मेरे शत्रुओं का सर्वथा नाश कर दीजिए। जो मनुष्य इस प्रकार अपने अधीन रहने वालों के लिए अभय प्रदान करने वाले हनुमानजी की प्रार्थना करता है, वह सभी जगह विजयी होता है। भला, उसकी हानि कैसे हो सकती है।

॥ श्रीमारुतिस्तोत्रं सम्पूर्णम्॥

श्रीहनुमदष्टोत्तरशतनामस्तोत्रम्

ध्यानम्

वन्दे विद्युज्ज्वलनविलसद्ब्रह्मसूत्रैकनिष्ठं
कर्णद्वन्द्वे कनकरचिते कुण्डले धारयन्तम्।
सत्कौपीनं कपिचरवृतं कामरूपं कपीन्द्रं
पुत्रं वायोरिनसुतसुखदं वज्रदेहं वरेण्यम्॥

स्तोत्रम्

आञ्जनेयो महावीरः हनूमान्मारुतात्मजः।
तत्त्वज्ञानप्रदायकः सीतामुद्राप्रदायकः॥ १॥
अशोकवनिकाच्छेता सर्वमाया विभञ्जनः।
सर्वबन्धविमोक्ता च रक्षोविध्वंसकारकः॥ २॥
परविद्यापरिहारः परशौर्यविनाशनः।
परमन्त्रनिराकर्ता परयन्त्रप्रभेदकः॥ ३॥
सर्वग्रहविनाशी च भीमसेनसहायकृत्।
सर्वदुःखहरः सर्वलोकचारी मनोजवः॥ ४॥
पारिजातद्रुमूलस्थः सर्वमन्त्रस्वरूपवान्।
सर्वतन्त्रस्वरूपी च सर्वयन्त्रात्मकश्च वै॥ ५॥
कपीश्वरो महाकायः सर्वरोगहरः प्रभुः।
बलसिद्धिकरः सर्वविद्यासम्पत्प्रदायकः॥ ६॥
कपिसेनानायकश्च भविष्यच्चतुराननः।
कुमारब्रह्मचारी च रत्नकुण्डलदीप्तिमान्॥ ७॥
सञ्चलद्बालसन्नद्धलम्बमानशिखोज्ज्वलः।
गन्धर्वविद्यातत्त्वज्ञो महाबलपराक्रमः॥ ८॥
कारागृहविमोक्ता च शृंखलाबन्धमोचकः।
सागरोत्तारकः प्राज्ञः रामदूतः प्रतापवान्॥ ९॥
वानरः केसरिसुतः सीताशोकनिवारणः।
अञ्जनागर्भसम्भूतो बालार्कसदृशाननः॥ १०॥

विभीषणप्रियकरो दशग्रीवकुलान्तकः।
लक्ष्मणप्राणदाता च वज्रकायो महाद्युतिः॥ ११॥
चिरजीवी रामभक्तो दैत्यकर्यविघातकः।
अक्षहन्ता काञ्चनाभः पञ्चवक्त्रो महातपाः॥ १२॥
लङ्किनीभञ्जनः श्रीमान् सिंहिकाप्राणभञ्जनः।
गन्धमादनशैलस्थः लङ्कापुरविदाहकः॥ १३॥
सुग्रीवसचिवो धीरः शूरो दैत्यकुलान्तकः।
सुरार्चितो महातेजा रामचूडामणिप्रदः॥ १४॥
कामरूपी पिङ्गलाक्षो वार्धिमैनाकपूजितः।
कवलीकृतमार्तण्डमण्डलो विजितेन्द्रियः॥ १५॥
रामसुग्रीवसन्धाता महारावणमर्दनः।
स्फटिकाभो वागधीशो नवव्याकृतिपण्डितः॥ १६॥
चतुर्बाहुर्दीनबन्धुर्महात्मा भक्तवत्सलः।
सञ्जीवननगार्हता शुचिर्वाग्मी दृढव्रतः॥ १७॥
कालनेमिप्रमथनो हरिमर्कटमर्कटः।
दान्तः शान्तः प्रसन्नात्मा शतकण्ढमदापहृत्॥ १८॥
योगी रामकथालोलः सीतान्वेषणपण्डितः।
वज्रदंष्ट्रो वज्रनखो रुद्रवीर्यसमुद्भवः॥ १९॥
इन्द्रजित्प्रहितामोघब्रह्मास्त्रविनिवारकः।
पार्थध्वजाग्रसंवासी शरपञ्जरभेदकः॥ २०॥
दशबाहुर्लोकपूज्यो जाम्बवत्प्रीतिवर्धनः।
सीतासमेतश्रीरामपादसेवाधुरन्धरः॥ २१॥

॥ श्रीहनुमदष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

हनुमत्सहस्रनामावलिः

विनियोगः—अस्य श्रीहनुमत्सहस्रनामस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, हनुमद्-देवता, अनुष्टुपछन्दः, रामं बीजं, मं शक्तिः श्रीहनुमत्प्रीत्यर्थं तद्दिव्यसहस्रनामभि-रमुकसंख्याकपुष्पादिद्रव्यसमर्पणे विनियोगः।

ध्यानम्

उद्यद्भानुसहस्रसंनिभतनुः पीताम्बरालंकृतः
प्रोज्ज्वालानलदीप्यमाननयनो निष्पिष्टरक्षोगणः।
संवर्तोद्यतवारिदोद्धतरवः प्रोच्चैर्गदाविभ्रमः
श्रीमान् मारुतनन्दनः प्रतिदिनं ध्येयो विपद्भञ्जनः॥ १॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः।
आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम्॥ २॥
मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये॥ ३॥

ततस्तन्नामभिः प्रत्येकं प्रणवादिभिः नमोऽन्तैरर्कपुष्पाणिसमर्पणं कुर्यात्। तद्यथा—

१. ॐ हनुमते नमः
२. ॐ श्रीप्रदाय नमः
३. ॐ वायुपुत्राय नमः
४. ॐ रुद्राय नमः
५. ॐ अनघाय नमः
६. ॐ अजराय नमः
७. ॐ अमृत्यवे नमः
८. ॐ वीरवीराय नमः
९. ॐ ग्रामवासाय नमः
१०. ॐ जनाश्रयाय नमः
११. ॐ धनदाय नमः
१२. ॐ निर्गुणाय नमः
१३. ॐ अकायाय नमः
१४. ॐ वीराय नमः
१५. ॐ निधिपतये नमः
१६. ॐ मुनये नमः
१७. ॐ पिङ्गाक्षाय नमः
१८. ॐ वरदाय नमः
१९. ॐ वाग्मिने नमः
२०. ॐ सीताशोकविनाशनाय नमः
२१. ॐ शिवाय नमः
२२. ॐ शर्वाय नमः
२३. ॐ पराय नमः
२४. ॐ अव्यक्ताय नमः
२५. ॐ व्यक्तव्यक्ताय नमः
२६. ॐ रसाधराय नमः
२७. ॐ पिङ्गकेशाय नमः
२८. ॐ पिङ्गरोम्णे नमः
२९. ॐ श्रुतिगम्याय नमः
३०. ॐ सनातनाय नमः
३१. ॐ अनादये नमः
३२. ॐ भगवते नमः

३३. ॐ देवाय नमः
३४. ॐ विश्वहेतवे नमः
३५. ॐ निराश्रयाय नमः
३६. ॐ आरोग्यकर्त्रे नमः
३७. ॐ विश्वेशाय नमः
३८. ॐ विश्वनायकाय नमः
३९. ॐ हरीश्वराय नमः
४०. ॐ भर्गाय नमः
४१. ॐ रामाय नमः
४२. ॐ रामभक्ताय नमः
४३. ॐ कल्याणाय नमः
४४. ॐ प्रकृतिस्थिराय नमः
४५. ॐ विश्वम्भराय नमः
४६. ॐ विश्वमूर्तये नमः
४७. ॐ विश्वाकाराय नमः
४८. ॐ विश्वदाय नमः
४९. ॐ विश्वात्मने नमः
५०. ॐ विश्वसेव्याय नमः
५१. ॐ विश्वाय नमः
५२. ॐ विश्वहराय नमः
५३. ॐ रवये नमः
५४. ॐ विश्वचेष्टाय नमः
५५. ॐ विश्वगम्याय नमः
५६. ॐ विश्वध्येयाय नमः
५७. ॐ कलाधराय नमः
५८. ॐ प्लवङ्गमाय नमः
५९. ॐ कपिश्रेष्ठाय नमः
६०. ॐ ज्येष्ठाय नमः
६१. ॐ वैद्याय नमः
६२. ॐ वनेचराय नमः
६३. ॐ बालाय नमः
६४. ॐ वृद्धाय नमः
६५. ॐ यूने नमः
६६. ॐ तत्त्वाय नमः
६७. ॐ तत्त्वगम्याय नमः
६८. ॐ सख्ये नमः
६९. ॐ अजाय नमः
७०. ॐ अञ्जनीसूनवे नमः
७१. ॐ अव्यग्राय नमः
७२. ॐ ग्रामस्वांताय नमः
७३. ॐ धराधराय नमः
७४. ॐ भूर्लोकाय नमः
७५. ॐ भूवर्लोकाय नमः
७६. ॐ स्वर्लोकाय नमः
७७. ॐ महर्लोकाय नमः
७८. ॐ जनलोकाय नमः
७९. ॐ तपसे नमः
८०. ॐ अव्ययाय नमः
८१. ॐ सत्याय नमः
८२. ॐ ओङ्कारगम्याय नमः
८३. ॐ प्रणवाय नमः
८४. ॐ व्यापकाय नमः
८५. ॐ अमलाय नमः
८६. ॐ शिवाय नमः
८७. धर्मप्रतिष्ठात्रे नमः
८८. ॐ रामेष्टाय नमः
८९. ॐ फाल्गुनप्रियाय नमः
९०. ॐ गोष्पदीने नमः
९१. कृतवारीशाय नमः
९२. ॐ पूर्णकामाय नमः
९३. ॐ धराधिपाय नमः
९४. ॐ रक्षोघ्नाय नमः
९५. ॐ पुण्डरीकाक्षाय नमः
९६. ॐ शरणागतवत्सलाय नमः
९७. ॐ जानकीप्राणदात्रे नमः
९८. ॐ रक्षःप्राणापहारकाय नमः
९९. ॐ पूर्णाय नमः
१००. ॐ सत्याय नमः
१०१. ॐ पीतवाससे नमः
१०२. ॐ दीवाकरसमप्रभाय नमः

१०३. ॐ द्रोणहर्त्रे नमः
१०४. ॐ शक्तिनेत्रे नमः
१०५. ॐ शक्तये नमः
१०६. ॐ राक्षसमारकाय नमः
१०७. ॐ रक्षोघ्नाय नमः
१०८. ॐ रामदूताय नमः
१०९. ॐ शाकिनीजीविकाहराय नमः
११०. ॐ भुभुकारहतारातये नमः
१११. ॐ गर्वाय नमः
११२. ॐ पर्वतच्छेदनाय नमः
११३. ॐ हेतवे नमः
११४. ॐ अहेतवे नमः
११५. ॐ प्रांशवे नमः
११६. ॐ विश्वभर्त्रे नमः
११७. ॐ जगद्गुरवे नमः
११८. ॐ जगन्नेत्रे नमः
११९. ॐ जगन्नाथाय नमः
१२०. ॐ जगदीशाय नमः
१२१. ॐ जनेश्वराय नमः
१२२. ॐ जगद्धिताय नमः
१२३. ॐ हरये नमः
१२४. ॐ श्रीशाय नमः
१२५. ॐ गरुडस्मयभञ्जनाय नमः
१२६. ॐ पार्थध्वजाय नमः
१२७. ॐ वायुपुत्राय नमः
१२८. ॐ अमितपुच्छाय नमः
१२९. ॐ अमितप्रभाय नमः
१३०. ॐ ब्रह्मपुच्छाय नमः
१३१. ॐ परब्रह्मणे नमः
१३२. ॐ पुच्छरोमेष्टाय नमः
१३३. ॐ सुग्रीवादियुताय नमः
१३४. ॐ ज्ञानिने नमः
१३५. ॐ वानराय नमः
१३६. ॐ वानरेश्वराय नमः
१३७. ॐ कल्पस्थायिने नमः
१३८. ॐ चिरञ्जीविने नमः
१३९. ॐ प्रसन्नाय नमः
१४०. ॐ सदाशिवाय नमः
१४१. ॐ सन्नताय नमः
१४२. ॐ सद्गतये नमः
१४३. ॐ युक्तये नमः
१४४. ॐ मुक्तिदाय नमः
१४५. ॐ कीर्तिनायकाय नमः
१४६. ॐ कीर्तये नमः
१४७. ॐ कीर्तिप्रदाय नमः
१४८. ॐ समुद्राय नमः
१४९. ॐ श्रीप्रदाय नमः
१५०. ॐ शिवाय नमः
१५१. ॐ उदधिक्रमणाय नमः
१५२. ॐ देवाय नमः
१५३. ॐ संसारभयनाशनाय नमः
१५४. ॐ बालिबन्धकृते नमः
१५५. ॐ विश्वजेत्रे नमः
१५६. ॐ विश्वप्रतिष्ठिताय नमः
१५७. ॐ लङ्कारये नमः
१५८. ॐ कालपुरुषाय नमः
१५९. ॐ लङ्केशगृहभञ्जनाय नमः
१६०. ॐ भूतावासाय नमः
१६१. ॐ वासुदेवाय नमः
१६२. ॐ वसवे नमः
१६३. ॐ त्रिभुवनेश्वराय नमः
१६४. ॐ श्रीरामरूपाय नमः
१६५. ॐ कृष्णाय नमः
१६६. ॐ लङ्काप्रासाद-भञ्जकाय नमः
१६७. ॐ कृष्णाय नमः
१६८. ॐ कृष्णस्तुताय नमः
१६९. ॐ शान्ताय नमः
१७०. ॐ शान्तिदाय नमः
१७१. ॐ विश्वपावनाय नमः
१७२. ॐ विश्वभोक्त्रे नमः

१७३. ॐ मारिघ्नाय नमः
१७४. ॐ ब्रह्मचारिणे नमः
१७५. ॐ जितेन्द्रियाय नमः
१७६. ॐ ऊर्ध्वगाय नमः
१७७. ॐ लाङ्गुलिने नमः
१७८. ॐ मालिने नमः
१७९. ॐ लाङ्गूलाहतराक्षसाय नमः
१८०. ॐ समीरतनुजाय नमः
१८१. ॐ वीराय नमः
१८२. ॐ वीरमाराय नमः
१८३. ॐ जयप्रदाय नमः
१८४. ॐ जगन्मङ्गलदाय नमः
१८५. ॐ पुण्याय नमः
१८६. ॐ पुण्यश्रवणकीर्तनाय नमः
१८७. ॐ पुण्यकीर्तये नमः
१८८. ॐ पुण्यगीतये नमः
१८९. ॐ जगत्पावन-पावनाय नमः
१९०. ॐ देवेशाय नमः
१९१. ॐ मितमाराय नमः
१९२. ॐ रामभक्तिविधायकाय नमः
१९३. ॐ धात्रे नमः
१९४. ॐ ध्येयाय नमः
१९५. ॐ भगाय नमः
१९६. ॐ साक्षिणे नमः
१९७. ॐ चेत्रे नमः
१९८. ॐ चैतन्यविग्रहाय नमः
१९९. ॐ ज्ञानदाय नमः
२००. ॐ प्राणदाय नमः
२०१. ॐ प्राणाय नमः
२०२. ॐ जगत्प्राणाय नमः
२०३. ॐ समीरणाय नमः
२०४. ॐ विभीषणप्रियाय नमः
२०५. ॐ शूराय नमः
२०६. ॐ पिप्पलाश्रयाय नमः
२०७. ॐ सिद्धिदाय नमः
२०८. ॐ सिद्धाश्रयाय नमः
२०९. ॐ कालाय नमः
२१०. ॐ कालभक्षकाय नमः
२११. ॐ भर्जिताय नमः
२१२. ॐ लङ्केशनिधनस्थायिने नमः
२१३. ॐ लङ्काविदाहकाय नमः
२१४. ॐ ईश्वराय नमः
२१५. ॐ चन्द्रसूर्याग्निनेत्राय नमः
२१६. ॐ कालाग्नये नमः
२१७. ॐ प्रलयान्तकाय नमः
२१८. ॐ कपिनायकाय नमः
२१९. ॐ कपिशाय नमः
२२०. ॐ पुण्यराशये नमः
२२१. ॐ द्वादशराशिगाय नमः
२२२. ॐ सर्वाश्रयाय नमः
२२३. ॐ अप्रमेयात्मने नमः
२२४. ॐ रेवत्यादिनिवारकाय नमः
२२५. ॐ लक्ष्मणप्राणदात्रे नमः
२२६. ॐ सीताजीवनहेतुकाय नमः
२२७. ॐ रामध्येयाय नमः
२२८. ॐ हृषीकेशाय नमः
२२९. ॐ विष्णुभक्ताय नमः
२३०. ॐ जटिने नमः
२३१. ॐ बलिने नमः
२३२. ॐ सिद्धाय नमः
२३३. ॐ देवारिदर्पघ्ने नमः
२३४. ॐ होत्रे नमः
२३५. ॐ धात्रे नमः
२३६. ॐ कर्त्रे नमः
२३७. ॐ जगत्प्रभवे नमः
२३८. ॐ नगरग्रामपालाय नमः
२३९. ॐ शुद्धाय नमः
२४०. ॐ बुद्धाय नमः
२४१. ॐ निरन्तनाय नमः
२४२. ॐ निरञ्जनाय नमः

२४३. ॐ निर्विकल्पाय नमः
२४४. ॐ गुणातीताय नमः
२४५. ॐ भयंकराय नमः
२४६. ॐ हनुमते नमः
२४७. ॐ दुराराध्याय नमः
२४८. ॐ तपःसाध्याय नमः
२४९. ॐ अमरेश्वराय नमः
२५०. ॐ जानकीधनशोकोत्थतापहर्त्रे नमः
२५१. ॐ पराशराय नमः
२५२. ॐ वाङ्मयाय नमः
२५३. ॐ सदसद्रूपाय नमः
२५४. ॐ कारणाय नमः
२५५. ॐ प्रकृतेपराय नमः
२५६. ॐ भाग्यदाय नमः
२५७. ॐ निर्मलाय नमः
२५८. ॐ नेत्रे नमः
२५९. ॐ पुच्छलङ्काविदाहकाय नमः
२६०. ॐ पुच्छबद्धाय नमः
२६१. ॐ यातुधानाय नमः
२६२. ॐ यातुधानरिपुप्रियाय नमः
२६३. ॐ छायापहारिणे नमः
२६४. ॐ भूतेशाय नमः
२६५. ॐ लोकेशाय नमः
२६६. ॐ सद्गतिप्रदाय नमः
२६७. ॐ प्लवङ्गेश्वराय नमः
२६८. ॐ क्रोधाय नमः
२६९. ॐ क्रोधसंरक्तलोचनाय नमः
२७०. ॐ क्रोधहर्त्रे नमः
२७१. ॐ तापहर्त्रे नमः
२७२. ॐ भक्ताभयाय नमः
२७३. ॐ वरप्रदाय नमः
२७४. ॐ भक्तानुकम्पिने नमः
२७५. ॐ विश्वेशाय नमः
२७६. ॐ पूरुहूताय नमः
२७७. ॐ पुरन्दराय नमः
२७८. ॐ अग्नये नमः
२७९. ॐ विभावसवे नमः
२८०. ॐ भास्वते नमः
२८१. ॐ यमाय नमः
२८२. ॐ निर्ऋतये नमः
२८३. ॐ वरुणाय नमः
२८४. ॐ वायुगतिमते नमः
२८५. ॐ वायवे नमः
२८६. ॐ कुबेराय नमः
२८७. ॐ ईश्वराय नमः
२८८. ॐ रवये नमः
२८९. ॐ चन्द्राय नमः
२९०. ॐ कुजाय नमः
२९१. ॐ सौम्याय नमः
२९२. ॐ गुरवे नमः
२९३. ॐ काव्याय नमः
२९४. ॐ शनैश्चराय नमः
२९५. ॐ राहवे नमः
२९६. ॐ केतवे नमः
२९७. ॐ मरुते नमः
२९८. ॐ होत्रे नमः
२९९. ॐ धात्रे नमः
३००. ॐ हर्त्रे नमः
३०१. ॐ समीरजाय नमः
३०२. ॐ मशकीकृतदेवारये नमः
३०३. ॐ दैत्यारये नमः
३०४. ॐ मधुसूदनाय नमः
३०५. ॐ कामाय नमः
३०६. ॐ कपये नमः
३०७. ॐ कामपालाय नमः
३०८. ॐ कपिलाय नमः
३०९. ॐ विश्वजीवनाय नमः
३१०. ॐ भागीरथीपदाम्भोजाय नमः
३११. ॐ सेतुबन्धविशारदाय नमः
३१२. ॐ नमःकाराय नमः

३१३. ॐ स्वधाकाराय नमः
३१४. ॐ हविषे नमः
३१५. ॐ कव्याय नमः
३१६. ॐ हव्याय नमः
३१७. ॐ प्रकाशकाय नमः
३१८. ॐ स्वप्रकाशकाय नमः
३१९. ॐ महावीराय नमः
३२०. ॐ लघवे नमः
३२१. ॐ अमितविक्रमाय नमः
३२२. ॐ भण्डानोड्डानगतिमते नमः
३२३. ॐ सद्गतये नमः
३२४. ॐ पुरुषोत्तमाय नमः
३२५. ॐ जगदात्मने नमः
३२६. ॐ जगद्योनये नमः
३२७. ॐ जगदन्ताय नमः
३२८. ॐ अनन्तकाय नमः
३२९. ॐ विपाप्मने नमः
३३०. ॐ निष्कलङ्काय नमः
३३१. ॐ महते नमः
३३२. ॐ महदहङ्कृतये नमः
३३३. ॐ खाय नमः
३३४. ॐ वायवे नमः
३३५. ॐ पृथिव्यै नमः
३३६. ॐ आपाय नमः
३३७. ॐ वह्नये नमः
३३८. ॐ दिक्पालाय नमः
३३९. ॐ एकस्थाय नमः
३४०. ॐ क्षेत्रज्ञाय नमः
३४१. ॐ क्षेत्रहन्त्रे नमः
३४२. ॐ पल्वीकृतसागराय नमः
३४३. ॐ हिरणमयाय नमः
३४४. ॐ पुराणाय नमः
३४५. ॐ खेचराय नमः
३४६. ॐ भूचराय नमः
३४७. ॐ मनसे नमः
३४८. ॐ हिरण्यगर्भाय नमः
३४९. ॐ सूत्राम्णे नमः
३५०. ॐ राजराजाय नमः
३५१. ॐ विशांपतये नमः
३५२. ॐ वेदान्तवेद्याय नमः
३५३. ॐ उद्गीथाय नमः
३५४. ॐ वेदाय नमः
३५५. ॐ वेदाङ्गपारगाय नमः
३५६. ॐ प्रतिग्रामस्थितये नमः
३५७. ॐ सद्यः स्फूर्तिदात्रे नमः
३५८. ॐ गुणाकराय नमः
३५९. ॐ नक्षत्रमालिने नमः
३६०. ॐ भूतात्मने नमः
३६१. ॐ सुरभये नमः
३६२. ॐ कल्पपादपाय नमः
३६३. ॐ चिन्तामणये नमः
३६४. ॐ गुणनिधये नमः
३६५. ॐ प्रजाद्वाराय नमः
३६६. ॐ अनुत्तमाय नमः
३६७. ॐ पुण्यश्लोकाय नमः
३६८. ॐ पुरारातये नमः
३६९. ॐ ज्योतिष्मते नमः
३७०. ॐ शर्वरीपतये नमः
३७१. ॐ किल्किलारावसंत्रस्तभूत-प्रेतपिशाचकाय नमः
३७२. ॐ ऋणत्रयहराय नमः
३७३. ॐ सूक्ष्माय नमः
३७४. ॐ स्थूलाय नमः
३७५. ॐ सर्वगतये नमः
३७६. ॐ पुंसे नमः
३७७. ॐ अपस्मारहराय नमः
३७८. ॐ स्मर्त्रे नमः
३७९. ॐ श्रुतये नमः
३८०. ॐ गाथायै नमः
३८१. ॐ स्मतये नमः

३८२. ॐ मनवे नमः
३८३. ॐ स्वर्गद्वाराय नमः
३८४. ॐ प्रजाद्वाराय नमः
३८५. ॐ मोक्षद्वाराय नमः
३८६. ॐ यतीश्वराय नमः
३८७. ॐ नादरूपाय नमः
३८८. ॐ परब्रह्मणे नमः
३८९. ॐ ब्रह्मणे नमः
३९०. ॐ ब्रह्मपुरातनाय नमः
३९१. ॐ एकाय नमः
३९२. ॐ अनेकाय नमः
३९३. ॐ जनाय नमः
३९४. ॐ शुक्लाय नमः
३९५. ॐ स्वयंज्योतिषे नमः
३९६. ॐ अनाकुलाय नमः
३९७. ॐ ज्योतिर्ज्योतिषे नमः
३९८. ॐ अनादये नमः
३९९. ॐ सात्त्विकाय नमः
४००. ॐ राजसाय नमः
४०१. ॐ तमसे नमः
४०२. ॐ तमोहर्त्रे नमः
४०३. ॐ निरालम्बाय नमः
४०४. ॐ निराकाराय नमः
४०५. ॐ गुणाकराय नमः
४०६. ॐ गुणाश्रयाय नमः
४०७. ॐ गुणमयाय नमः
४०८. ॐ बृहत्कायाय नमः
४०९. ॐ बृहद्यशसे नमः
४१०. ॐ बृहद्धनुषे नमः
४११. ॐ बृहत्पादाय नमः
४१२. ॐ बृहन्मूर्ध्ने नमः
४१३. ॐ बृहत्स्वनाय नमः
४१४. ॐ बृहत्कायाय नमः
४१५. ॐ बृहन्नासाय नमः
४१६. ॐ बहद्बाहवे नमः
४१७. ॐ बृहत्तनवे नमः
४१८. ॐ बृहद्यत्नाय नमः
४१९. ॐ बृहत्कार्याय नमः
४२०. ॐ बृहत्पुच्छाय नमः
४२१. ॐ बृहत्कराय नमः
४२२. ॐ बृहद्गतये नमः
४२३. ॐ बृहत्सेव्याय नमः
४२४. ॐ बृहल्लोकाय नमः
४२५. ॐ फलप्रदाय नमः
४२६. ॐ बृहच्छक्तये नमः
४२७. ॐ बृहद्वाञ्छाफलदाय नमः
४२८. ॐ बृहदीश्वराय नमः
४२९. ॐ बृहल्लोकनुताय नमः
४३०. ॐ द्रष्ट्रे नमः
४३१. ॐ विद्योद्गात्रे नमः
४३२. ॐ जगद्गुरवे नमः
४३३. ॐ देवाचार्याय नमः
४३४. ॐ सत्यवादिने नमः
४३५. ॐ ब्रह्मवादिने नमः
४३६. ॐ कलाधराय नमः
४३७. ॐ सप्तपातालगामिने नमः
४३८. ॐ मलयाचलसंश्रयाय नमः
४३९. ॐ उत्तराशास्थिताय नमः
४४०. ॐ श्रीदाय नमः
४४१. ॐ दिव्यौषधिवशाय नमः
४४२. ॐ खगाय नमः
४४३. ॐ शाखामृगाय नमः
४४४. ॐ कपीन्द्राय नमः
४४५. ॐ पुराणाय नमः
४४६. प्राणचञ्चुराय नमः
४४७. ॐ चतुराय नमः
४४८. ॐ ब्राह्मणाय नमः
४४९. ॐ योगिने नमः
४५०. ॐ योगगमम्याय नमः
४५१. ॐ परावराय नमः

४५२. ॐ अनादये नमः
४५३. ॐ निधनाय नमः
४५४. ॐ व्यासाय नमः
४५५. ॐ वैकुण्ठाय नमः
४५६. ॐ पृथिवीपतये नमः
४५७. ॐ अपराजितये नमः
४५८. ॐ जितारातये नमः
४५९. ॐ सदानन्दाय नमः
५६०. ॐ ईशित्रे नमः
४६१. ॐ गोपालाय नमः
४६२. ॐ गोपतये नमः
४६३. ॐ गोप्त्रे नमः
४६४. ॐ कलये नमः
४६५. ॐ कालाय नमः
४६६. परात्पराय नमः
४६७. ॐ मनोवेगिने नमः
४६८. ॐ सदायोगिने नमः
४६९. ॐ संसारभयनाशनाय नमः
४७०. ॐ तत्त्वदात्रे नमः
४७१. ॐ तत्त्वज्ञाय नमः
४७२. ॐ तत्त्वाय नमः
४७३. ॐ तत्त्वप्रकाशकाय नमः
४७४. ॐ शुद्धाय नमः
४७५. ॐ बुद्धाय नमः
४७६. ॐ नित्ययुक्ताय नमः
४७७. ॐ भक्ताकाराय नमः
४७८. ॐ जगद्रथाय नमः
४७९. ॐ प्रलयाय नमः
४८०. ॐ अमितमायाय नमः
४८१. ॐ मायातीताय नमः
४८२. ॐ विमत्सराय नमः
४८३. ॐ मायानिर्जितरक्षसे नमः
४८४. ॐ मायानिर्मितविष्टपाय नमः
४८५. ॐ मायाश्रयाय नमः
४८६. ॐ निर्लेपाय नमः
४८७. ॐ मायानिर्वर्तकाय नमः
४८८. ॐ सुखाय नमः
४८९. ॐ सुखाऽसुखप्रदाय नमः
४९०. ॐ नागाय नमः
४९१. ॐ महेशकृतसंस्तवाय नमः
४९२. ॐ महेश्वराय नमः
४९३. ॐ सत्यसंधाय नमः
४९४. ॐ शरभाय नमः
४९५. ॐ कलिपावनाय नमः
४९६. ॐ रसाय नमः
४९७. ॐ रसज्ञाय नमः
४९८. ॐ सन्मानाय नमः
४९९. ॐ रूपाय नमः
५००. ॐ चक्षुषे नमः
५०१. ॐ स्तुतये नमः
५०२. ॐ रवाय नमः
५०३. ॐ प्राणाय नमः
५०४. ॐ गन्धाय नमः
५०५. ॐ स्पर्शाय नमः
५०६. ॐ स्पर्शनाय नमः
५०७. ॐ अहङ्कारमानगाय नमः
५०८. ॐ नेतिनेतीतिगम्याय नमः
५०९. ॐ वैकुण्ठभजनप्रियाय नमः
५१०. ॐ गिरिशाय नमः
५११. ॐ गिरिजाकान्ताय नमः
५१२. ॐ दुर्वाससे नमः
५१३. ॐ कवये नमः
५१४. ॐ अङ्गिरसे नमः
५१५. ॐ भृगवे नमः
५१६. ॐ वसिष्ठाय नमः
५१७. ॐ च्यवनाय नमः
५१८. ॐ नारदाय नमः
५१९. ॐ तुम्बराय नमः
५२०. ॐ अमलाय नमः
५२१. विश्वक्षेत्राय नमः

५२२. विश्वबीजाय नमः
५२३. ॐ विश्वनेत्राय नमः
५२४. ॐ विश्वपाय नमः
५२५. ॐ याजकाय नमः
५२६. ॐ यजमानाय नमः
५२७. ॐ पावकाय नमः
५२८. ॐ पित्रे नमः
५२९. ॐ श्रद्धायै नमः
५३०. ॐ बुद्ध्यै नमः
५३१. ॐ क्षमायै नमः
५३२. ॐ तन्द्रायै नमः
५३३. ॐ मन्त्राय नमः
५३४. ॐ मन्त्रयित्रे नमः
५३५. ॐ सुराय नमः
५३६. ॐ राजेन्द्रयाय नमः
५३७. ॐ भूपतये नमः
५३८. ॐ रुण्डमालिने नमः
५३९. ॐ संसारसारथये नमः
५४०. ॐ नित्याय नमः
५४१. ॐ सम्पूर्णकामाय नमः
५४२. ॐ भक्तकामदुधे नमः
५४३. ॐ उत्तमाय नमः
५४४. ॐ गणपाय नमः
५४५. ॐ केशवाय नमः
५४६. ॐ भ्रात्रे नमः
५४७. ॐ पित्रे नमः
५४८. ॐ मात्रे नमः
५४९. ॐ मारुतये नमः
५५०. ॐ सहस्त्रमूर्ध्ने नमः
५५१. ॐ सहस्त्रास्याय नमः
५५२. ॐ सहस्त्राक्षाय नमः
५५३. ॐ सहस्त्रपादाय नमः
५५४. ॐ कामजिते नमः
५५५. ॐ कामदहनाय नमः
५५६. ॐ कामाय नमः

५५७. ॐ काम्यफलप्रदाय नमः
५५८. ॐ मुद्रापहारिणे नमः
५५९. ॐ रक्षोघ्नाय नमः
५६०. ॐ क्षितिभारहराय नमः
५६१. ॐ अकलाय नमः
५६२. ॐ नखदंष्ट्रायुधाय नमः
५६३. ॐ विष्णवे नमः
५६४. ॐ भक्ताभयवरप्रदाय नमः
५६५. ॐ दर्पघ्ने नमः
५६६. ॐ दर्पदाय नमः
५६७. ॐ इष्टाय नमः
५६८. ॐ शतमूर्तये नमः
५६९. ॐ अमूर्त्तिमते नमः
५७०. ॐ महानिधये नमः
५७१. ॐ महाभागाय नमः
५७२. ॐ महाभर्गाय नमः
५७३. ॐ महर्द्धिदाय नमः
५७४. ॐ महाकाराय नमः
५७५. ॐ महायोगिने नमः
५७६. ॐ महातेजसे नमः
५७७. ॐ महाद्युतये नमः
५७८. ॐ महाकर्मणे नमः
५७९. ॐ महानादाय नमः
५८०. ॐ महामन्त्राय नमः
५८१. ॐ महामतये नमः
५८२. ॐ महाशयाय नमः
५८३. ॐ महोदराय नमः
५८४. ॐ महादेवात्मकाय नमः
५८५. ॐ विभवे नमः
५८६. ॐ रौद्रकर्मणे नमः
५८७. ॐ अकृतकर्मणे नमः
५८८. ॐ रत्ननाभाय नमः
